M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref. / Ser. 1544

Title: Vaital Panchvimasati

1544

InComplete

	Vaital Panchvim sati	: Title
		: Author
		: Editor
80		: Year, Vols.
		: Publisher
1544	Pages 4 to 28	: Remarks

विक्रमः संजातः तावन्नं विप्रा पुनरभ्यासितः ॥ मंत्रिणा शिशुकी दृष्टा तयाक पोलस्थे दारिद्रितो ॥ सरोषं यवनं कथितं ॥
त्वकृत्वा यानुर्यति क्षिप्रं मंत्री राजानमुवाच देदेव अस्य प्रकार मस्ति दशादिव समनीक्षा कार्या कि लपक्ष ॥ समायातस्यति ता
वद्भयं कुरु ॥ इति तथा प्रापितं ॥ तस्मा त्वं विक्रमो भवान् ॥ ततः प्रस्थपक्षे प्राप्ते पुनरपि शिशुकी प्रेषिता ॥ सावराज्य
दं गोखापक्षावती समीपं यावद्दृष्टा तावत्पश्चात्त्यक्तुं कुम्भालग्ना विधिरं गुर्वी ॥ तस्याः कपोले ताडितं ॥ देवद्यापि ते
[illegible] शीघ्रं गच्छेत्युक्त्वा शिशुकी पुनरपि कुर्मनेव समायाता ॥ तां दुर्मुखी दृष्ट्वा पुनरपि राजा विक्रमः संजातः ॥ शिशुकथा कु
कुमहत्स्नेन कपोलताडनादि दर्शितं ॥ ततः प्रधाने [illegible] ॥ राजानं स्वारत्य लाति ॥ चतुर्थदिवसे स्नानं करिष्यति ॥
तर्हि चा प्रथमं स्नानं [illegible] ॥ ये राजकीतथा ॥ तृतीयदिने [illegible] चतुर्थे दिने [illegible] चतुर्थ दिवसे अति [illegible]
पुनरपि प्रेषिता ॥ आगतां दृष्ट्वा स्नानभोजनादिकं विधाय रात्रौ [illegible] दत्वा [illegible] पर्यङ्क [illegible]
[illegible] गवाक्ष मार्गेण अधस्तात् [illegible] गृहमागत्य सर्वं पितुः [illegible] सर्वं निवेदितं [illegible]
राज्ञा पुनरपि विक्रमो [illegible] मंत्रिणा पुनराश्वास्य राजानमुक्तं देदेव अद्य [illegible]
मणि [illegible]

वाधूंवाधा तत्र शिक्षेत्र पविष्टं राज्ञा पतया ।। वाससमागे ०।। ५ कारपं नीता तयामूर्तः कामद्वव महीमंडलप्रासदतिथ्या गे ।। स्ना
नभोजनानुलेपनादि ।। ६ गिर जिनं यत यातल्पेनना ।। राज्ञ तत्रोपविष्ट आलिंगनचुंबनादिकं श्रारह्यं ।। न कंचे ।। अथ रता
द्रमते नारी उपरि शाय्य कामुकं ।। प्रसिद्धं तद्रतं ज्ञेयं सर्वकामिजनप्रियं ।। उपरिस्थपदा नारी रमते कामुकं नरं ।। विपरीतरतं
ज्ञेयं सर्वकामिजनप्रियं ।। पश्चाद्बद्ध [illegible] नारी यत्र कामार्थिनी नरं ।। धेनुकं तद्रतं ज्ञेयं विरक्तजनप्रियं ।। धूगानचूर्णेन करोति
रागं रागक्षम [illegible] बाधि [illegible] ।। पद्मा विकं स्यात् करोति गिर्धं [illegible] पाधिकं र [illegible] धिकारि ।। एवं तया सह राज्ञा नानाविधा
भोगाः कृताः ।। तत्र नवोढा [illegible] गमाह ।। ७ यथा कालीनापार्श्वं मुखमभिमुखं नैव कुसते धुनानाम धूनिं हरति वेदनं चुंबनविधौ ।।
कथत्र [illegible] हस्तं क्षिपति रामं नारोपितमनाः नवोढा वोढारं रमयति त्रसंतापयति च ।। गाढालिंगने वामनी [illegible] जरोमा अ
द्गमा साद् [illegible] विफल [illegible] ।। मानद मा विमानय [illegible] राजा [illegible] सुप्ता किं नु मतां नु किं ४
मनसि मे लीना विलीना नु किं ।। यासां चंदनपंकमंग [illegible] मदंगुरुमन्यं तेसु [illegible] कुचे च शयने स्वेद [illegible] गच्छति ।।
सा सर्वांग [illegible] स्वस हते केना [illegible] पवनो [illegible] मयया स्नेह स्यात् किं तु कुरे ।। ।। ततः सुरतां तप धावस्था
[illegible] देवम माभिप्राय स्वयाश्रातः किं [illegible] ।। राज्ञो [illegible] तयो [illegible] प्रातः प्राद्

र्णिकं कृत्वा तस्मै प्रयच्छिष्यामि ।। इति श्रुत्वा राज्ञा भ्रातरं नैव मार्गेण अधोवानः ।। सा गत्वा सं मंत्रिणं सर्वं हि शांतं कथया
मास ।। मंत्रिणोक्तं अद्यमदर्थं विषलड्डुकान्प्रेषयिष्यामि ।। सा भिक्षुकी प्रत्यपायनिरीक्षणार्थं प्रेषिता भिक्षुकया हस्ते
विषलड्डुकाः प्रेषिताः ।। [illegible] श्वाय प्रदेयाः नितान्तं लड्डुकान् [illegible] तेषां मध्ये एकः श्वानो मुखे निक्षिप्तः ।। ततो
ऽसौ श्वानो [illegible] श्वानं मृतं दृष्ट्वा राजा कुपितः ।। [illegible] दग्ननं नगरात् ध्यानि मि त्व वधकार्ये [illegible] अहितम व अवरु
कर्तुमुक्तमिति ।। मंत्रिणोक्तं ।। [illegible] मुक्तामि गृहे वा भ्रूषितं तथा ।। कार्म [illegible] सावर्यो [illegible] हितं तस्य समाचरेत् ।। स
र्णाः समं मित्रं प्रश्रंसंति [illegible] ।। [illegible] रंना [illegible] तस्मिन्न रक्षति नित्यदा ।। देवं अद्य निद्रा थ समये सुखसंभोग
विधायतस्याबलं धारयं [illegible] कारेणान्तः खसरं तत्र यदि [illegible] आभरणानि गृहीत्वा [illegible] ममा गंतव्यं ।। यदुक्तं मंत्रिणा
तदाज्ञा कृतं [illegible] न्याभरणानि गृहीत्वा तपस्विवेषो व्याय महाश्मशाने गतः ।। जटामुकुटधारी च कृतचंद्रार्धशे
खरः ।। बद्धपद्मासनो मौनी दृष्टन्मीलितलोचनः ।। तान्याभरणानि समीपे निधाय ध्याय [illegible] नेति ष्ठति ता
वद्राजकीयैः पुरुषैश्चौरान्वेषणार्थं गतैः स भिक्षुकवेषधारी दृष्टः ।। धृत्वा राजसमीपे नीतः ।। राज्ञा तपस्वी दृष्टः ।।
[illegible] भगवन् राज्ञी [illegible] यमाभरणं कुत्र लब्धं [illegible] ।। अद्य चतुर्दश्यां रक्तकरवीरकुसुमैः मंडलं [illegible] पिता तत्र धा

५ स्नंत्र अपि लाहवनं विधाय कृतवेता आदिनो वर्हिर्दिनः । तं वलि लोलुकामाः यावद्देवेभ्यः समायाताः । तासां
मध्ये वामजे वाप्यां त्रिशूलेनैका आहता । अथ से विस्मयातया आभरणानि त्यक्तानि तानि मया गृहीतानि तद
र्सनं राज्ञा श्रुतं ॥ तत्श्रुत्वा राज्ञा पद्मावत्याः वामजंघा याल्पा छनं निरीक्षणार्थं धात्री प्रेषिता । तयैव लोकनेन सर्वं दृष्टा
धात्र्या राज्ञे कथितं । श्रुत्वा [illegible] ति ॥ ॥ अर्थनाशं मनस्तापं गृहदुश्चरितानि च ॥ वंचनं चापमानं च म
तिमान्न प्रकाशयेत् ॥ राज्ञा पुनरपि महत्तरकः पृष्टः । भगवन् तस्याः कोदंडो विधीयते तदा चौ वहिष्कृति । भत्ता
रकेण स्वार्थपरेणोक्तं । धर्मं विविज्ञाय [illegible] ॥ स्वार्थसमुद्भवे [illegible] दिम्रु [illegible] ति । राजन् । अथ [illegible] ने
हत्यागाव: स्त्रियो बालाः प्रजा तथा । [illegible] पुरुषः प्रावणागतः ॥ सर्वे पापाः विनैनाम [illegible]
बहिर्विसर्जनमेव युक्तो दंडः । ततः अपरिक्षितेन राज्ञा स्वभाण्डे [illegible] स्वनगरान्निष्कासिता । ततः सर्व ये
विषण्णा राजकुमारेण वहिर्निर्गत्वा पद्मावती हयमारोप्य स्वनगरं नीता । ततोनंतरं [illegible] कृत्वा [illegible] ५
सौदं तपाटकः मातापित्रोः समीपे विरूयजरा [illegible] ग्राम विपसन्निधौ । कृतं ताविहितं [illegible] निर्मितं ।
नरावनन्यथाकर्तुं पंडितेश्वरेणापि ॥ [illegible] ॥ ॥ वामोहमम [illegible] पुनर्ति दिवाल [illegible] कस्य

सवत्सधेनुहरणे जातामतिश्चार्जुने । घृतेनाहत्य तु स्वयं च मदिर्षां धर्मात्मजोद्भवान् प्रायः सत्पुरुषो विना
असमये खु [illegible] ॥ ॥ एवं कथानकं कथयित्वा विक्रमं प्रति वेतालेनोक्तं । भो राजन् एतेषां मध्ये कस्य पापं
तद्वद । जानन्यदि न कथयसि तदा ब्रह्महत्यां प्राप्स्यसि । विक्रमसेनेनोक्तं ॥ नहि नागरनिपुणानां धर्मा
धर्मविचारणा ॥ मंत्रिपुत्रस्तु परस्य स्वामिनो विदधे हितं ॥ ज्ञातव्यं हि जीयस्मात्सन्तस्ते चारचक्षुषा ॥ च
क्षिरं सर्वभूतानां असत्यं सत्यमेव वा ॥ तस्मादविचारेण राज्ञः पापं भवेदिति ॥ एवं आत्मनि [illegible] पुनः
शिंशुपवृक्षे लग्नो वेतालः ॥ इति श्रीवेतालपंचविंशत्यां पद्मावती कथानकं प्रथमं ॥ ॥छ॥ ॥ तं [illegible] मानिशाम
दांदेवं सर्वसंतापहारिणी । पश्चात् विशालाक्षी [illegible] निर्लेपभासने स्थितां ॥ पुनरपि राजा शिंशपा वृक्षाद्वेतालं स्व
स्कंधे समारोप्य मौनेन मार्गेणायायौ ॥ पुनर्वेतालेनोक्तं ॥ ॥ अस्ति धर्मस्थानं नाम नगरं । तत्र राजा गुणशेखरो ना
म । तस्य नगरे केशवो स्वामी नाम ब्राह्मणः प्रतिवसति ॥ तस्य सुता मंदाकिनी नाम अतीव सौंदर्यसंपन्ना
जनमनोहारिणी साक्षाद्रतिरिव आसीत् । तावद्विवाहयोग्या संजाता । तदा केशवमधुसूदन त्रिवि
क्रमवामनाश्चैति त्रयो वराः समायाताः । तदा केशवः कस्मै दातव्येयं कन्येति चेतसि विचारयामास ॥ ए

तस्मिन्नंतरे सा सर्पदष्टा मंदाकिनी मृता अभूत्॥ ततः पिता बांधवाः श्रुत्वा चिंतातुरा भूत्वा अहितुंडकं समानीय साध्यं
चिकित्सां निदर्शयामास। अहितुंडकः प्राह॥ पंचमी नवमी षष्ठी चतुर्दश्यष्टमी क्षमा॥ तिथयो गर्हिताश्चैता दष्टस्य मर
णं ध्रुवं॥ रोहिणी च तथाश्लेषा विशाखा मूलकृत्तिका॥ मघा भरण्यश्च नन्याद्र राशीन्नक्षत्रकैस्तथा॥ ज्योतिष र
त्नमालायां श्रीपतिः॥ पंचमी कृष्णपक्षे च विशाखा सार्पा नक्षत्रे सुभुजंगदष्टः॥ सेवेन तेयेन सुरक्षितोपि प्राप्नो
ति मृत्युं वदनं मनुष्यः॥ इति मांत्रिकवचनानंतरं बांधवेन तदा यमुनायां गंगास्थले वा पाप्यादि दहेत् विषदष्ट श्मशान
निर्यं मरिष्यति किं मोक्षं येन मंत्रेणेति सा च मृता तदा यत्र श्मशाने नीत्वा चिंतां संस्कारः कृतः। अथ पाय राजेपि
श्मशाने समायाता। केचनबांधवाः पक्वविध। तद्भस्म गृहीत्वा वामनोदेवोनगरगतः॥ त्रिविक्रमः अरथीं निगृ
हीत्वा गंगां गतः। तृतीयः श्मशाने कुटीरं कृत्वा तिष्ठति। प्रथमविप्रेण कस्मिंश्चिन्नगरे ब्राह्मणस्य गृहं गत्वा
भोजनं प्रार्थितं। तद्गृहस्वामिना भोजनं दत्तं। तदा तस्य तेषु सार्यां बालेन रोदनमारब्धं तस्य माता बालं गृहीत्वा
कुपिता ज्वलत्पावके चिक्षेप। तद्दृष्ट्वा विप्रेणोक्तं। हे गृहस्वामिन्नत्र गृहे भोजनं न करिष्यामि नेत्तो मीः। किं कारण
मिति। अनाथो ब्राह्मणस्य गृहे दृष्टं आसुरकर्म प्रवृत्तं तेन गमनमपि अयोग्यं। तच्छ्रुत्वा विप्रेण गृहस्वामिन गृह

मध्यात्पुस्तकमानीय तत्र छाद्यमंत्रमेकं जपित्वा भस्म। भूतस्य जीवनं कृतं। विप्रेण कौतुकं दृष्ट्वा चिंतितं। यदीय
या पुस्तकं प्राप्यते तदा मंदाकिन्याः संजीवनं भविष्यति। इति मत्वा तस्य गृहात् ज्ञो वंचनेन पुस्तकं गृहीत्वा
धर्मस्थानं नगरं ययौ॥ श्मशानं गतवान् त्रिविक्रमेण पुनः स्वयमायाति तत्याविप्रेण गंगायामस्थीनि निक्षिप्या
नंदे वसमाययौ॥ परस्परं त्रयाणां संतापं जातं। भो मित्र वदेशागतं गतेन किं विधिर्यपोहशानवा। तेनोक्तं
अहं संजीवनविद्यां जानामि। तदा द्वितीयेनोक्तं। यदि जानासि तर्हि मृतां ब्राह्मणकन्यां मंदाकिनीं जीवयस्वेति
जीवयिष्यामि। तेन पुस्तकमुद्धाट्य मंत्रो जपितः भस्म भूताकृपा तस्य कन्या जाता द्वितीयोक्तिना॥ तदर्थं त्रयो
विप्राः कोपवाद्ब्रवे कुर्वंति स्म। तदवसंमिते तवेतालेनोक्तं भो राजन्नमत्रयाणां विप्राणां मध्ये कस्य भार्या युक्तास्तेति
कथयत्वं व्यवहारनिपुणोसि। पृथ्वीपतिः तदा विक्रमो प्राह॥ श्रूयतां प्रश्नं सर्वं संवद्दितं किस्मयोरुदितं प्रेत
संतीविताकन्यापि पिताप्राणदायकः॥ येमास्थीनि प्रणीतानि सपुत्रः पृष्टिकीर्तितः॥ तत्र स्थोय सवै तेन यौन
श्मशाने निवसति॥ येन कृत्वा पुनर्गीतोसी दैवतात्तवः॥ भूरणे च वादरः कार्यो न विनेषु कदाचन॥ सुलभं धनिनां द्युतु
र्जनागुणिनां गिरः॥ ॥इति श्री वेतालपंचविंशत्यां वररत्नकथानकं द्वितीयं॥ ॥श्री॥ ॥श्री॥ ॥२॥

अगजाननपद्मार्कं गजाननमहर्निशं ॥ अनेकदं तं भक्तानां एकदंतमुपास्महे ॥ पुनर्वेतालं गृहीत्वा राजा ययौ ॥ वेतालो
वाच ॥ राजन्नस्ति भोगवती नाम नगरी तत्र राजा रूपसेनो नाम प्रतिवसति स्म । तस्य धवलगृहे विदग्धचूडामणि
नामा हेमपंजरस्थः शुकः आसीत् । स राज्ञा पृष्टः । हे शुक त्वं किं जानासि । शुकेनोक्तं । सर्वमेवाहं जानामि । तर्हि मदा
गणितं यदि जानासि तर्हि ममानुरूपा स्त्री कुत्रास्ति तत्कथय । शुकेनोक्तं । मगधदेशे मगधेश्वरो नाम राजा अ
स्ति तत्सुता सुंदरी नाम सा तवानुरूपा भविष्यति । मगधसुतया चंद्रिकानामा सारिका पृष्टा । ममानुरूपः कश्चिदस्ति । तयो
क्तं । अस्ति भोगावत्यां रूपसेनो नाम राजा सर्वकलाकुशलः सर्वांगसुंदरः हस्त्यश्वरथपदातिसंपन्नः । स तव भर्ता
भविष्यति । तच्छ्रुत्वा विरहवेदनया पीडिता यावत्तिष्ठति तावद्रूपसेनः शुकं प्राह । हे शुक त्वं मगधेश्वरं गत्वा मदर्थं कन्या
प्रार्थनीया । तद्वचनं श्रुत्वा स शुकः मगधेश्वरनगरं प्रययौ । दृष्टं च नगरं गजाश्वशालागजशालाविराजमानं ध्वजशालाव्याप्तं
धर्मशालाधूपशाला अन्नशालाविराजितं । यत्र च वसंत्यगणितसामर्थ्यवतां आत्मजानां घोषः श्रूयते । तत्तुंगगिरिशिखर
संकाशदेवतायतनविराजितं स्वर्णकलशैः शोभितं नगरं । तत्र मगधेश्वरः स्वर्णसिंहासने उपविष्टः । महीमंडलमंडि
तनरेंद्रवत्तस्याग्रे पार्श्वे मंत्रिणः उपविष्टाः सभासदश्च मीमांसकवैदिकतार्किकगाथागायनकवितां कादयश्चाविर्भ
ते । तत्र सभायां शुकोगतः आगतं शुकं आह । राजन् रूपसेनो नाम राजा भोगावत्यामस्ति तेन स्वार्थं च त्वत्कन्यां विवाहयितुं याचितुं
प्रार्थनार्थमहं प्रेषितः । तच्छ्रुत्वा त्वया श्रुते नं चिंतयतः राजा प्राह । रूपसेनाय कन्यां दास्यामि सुलग्नं प्रेक्ष्य त्वया रू
पसेनं गृहीत्वा आगंतव्यं । इति राजवचनमासाद्य पुनः स्वनगरं ययौ । रूपसेनाय सर्वं कथितं । कथितवान् हे राजन् शुक
माश्रित्य सुलग्नादिकं विचार्य शुकेन सह तदेव प्रस्थितः । तत्र गत्वा विवाहोत्सवः । राजा नवोढां प्रियां गृहीत्वा भोगावतीं ययौ ।
तया सह मदनमंजरी नाम सारिका आयाता राज्ञा शुकपंजरे स्थापिता । तां सारिकां मनोहरां विलोक्य शुको मदातुरो भूत्वा सारि
कामाह । हे प्रिये सारिके संभोगं देहि । भर्तारं त्यक्त्वा वनं चारिणी चिंतितं च निरर्थकं । यो न वेत्ति पुमान् मूढः स्त्रियाः सुरतान्यदा
उभयोः कामश्च सुख ॥ यः परस्त्रियं रच्छंति नयति पालित्यने चंदनं स्वच्छंदे जीर्णिर्तौ च पत्रराजितं निरूपयेत् नूपुरे तव मायां
त्वचिरेण सर्वविषयाः कामं तदेका प्रत्ता सुरंध्याः तत्सुरतेन कपोलिधन्तयेत् शोषान् लोकास्ति ॥ यत्तस्थानि स्वयं पादे प्राणि
रक्षितं दिने दिने गच्छति नाथयो वनं । मन्तव्यं का दास्यति पिंडरसं निधायालिवाद ते सार्धं मलोमत्सं भेरा ॥ अनादेशे से
वितं तन्नाम तदेव सत्वं । अतः संभोगं देहि ॥ तयोक्तं ॥ नाहं पुरुषं स्वयं वांछां करोमि ते वयं कृतघ्नाः मया पुरुषा
पापिष्ठाः स्त्रीघातकाः भवंति । नरो कंठस्थितोपि पुरुषं विश्वसेत् नयमेतत् दृष्टं विरण्यं ॥ उक्तं च ॥ अनृतं साहसं मायामूर्ख

लमति जेजनता ॥ अशोकं निर्दयित्वं च कीर्यादोषाः स्वभावजाः ॥
उत्पत्तिसार्द्धमन्येन हसंत्यन्ये सविभ्रमं ॥ हृदयं चिंतयंत्यन्यं वि चित्रचरिताः स्त्रियः ॥ तयोर्विवादं श्रुत्वा
राज्ञा भणितं किमिदं युवाभ्यां विवादकारणं । सारिकयोक्तं देवपुरुषाः पापिष्ठाः स्त्री भक्तः ॥ अत्र
कथानकमस्ति ॥ अस्ति केश्चपुरं नाम नगरं तत्र महाधनो नाम श्रेष्ठी आसीत् । तस्य पुत्रो धनक्षय
यो नाम । पुण्यवर्द्धनेन नगरे हृषभ श्रेष्ठी आसीत् । तस्य कन्या सुश्री । सा धनक्षये न परिणीता पितृगेहे
तिष्ठति तस्य पितायं चलंगतः । तेन सर्वं पिपितृधनं द्यूते हारितं । यथार्थ नामा जातः कारसी श्रीद्दि
श्वसुरगृहे गतः कतिपयदिनानि तत्र स्थितः सालंकरणां स्वभार्यां आदाय स्वनगरामिमुखं
प्रस्थितः । मार्गे स्त्रियमुवाच हे प्रिये अत्र चोरभयं अस्ति आभरणादि सर्वं मह्यं प्रयच्छ इत्युक्ता त
स्याः आभरणानि गृहीत्वा अंधकूपे मार्गे स्त्रियमेव निपपात । सा च मूर्छिता धैर्यं धृत्वा नीत इति मन्यमाना
ना मार्गे रुदती स्थिता । तावत्पथिकै दृष्टा । अये बाले किं रुदसि । तयोक्तं अहं वृषभश्रेष्ठी नाम्नो

दुहिता मम भर्त्ता चोरैर्नीतः । तच्छ्रुत्वा पथिकैः सा पितुरग्रे कथितं पित्रा श्रुत्वा कन्या स्वगृहं नीतवान् । पुनर्मानाकरणं
स्वादि वृषभश्रेष्ठी दत्वा बालं मह्यं सुखेन तिष्ठे त्यास्वासितवान् । कतिपयदिनानि तत्र स्थापिता धनक्षयस्तस्मिं
श्वादि वृषभश्रेष्ठी दत्वा बाल्यमह्यं सुखेन तिष्ठे त्याश्वासितवान् । हस्तेन वराटकोपि नास्ति । पुनश्च
अकूपान्निर्गत्य स्वगृहं गत्वा तत्र स्वनगरे द्यूतं क्रीडित्वा भूषणादिकं सर्वं हारितवान् । सर्वेपि सुहृदः सोत्साहाः संजाताः रा
त्रिपर्यदिवसे श्वशुरगृहे ययौ । जामाता चोरहस्तात्पुनरागत इति मन्यमानाः सर्वेपि सुहृदः सोत्साहाः संजाताः । तयातं त्वदंपतिश्च
त्रोमंतर्गृहं भार्यया सह तत्पे उपविष्टः । भार्या उवाच । हे प्रिय मया अन्यत्पत्ये कापि कथं जीवाम् । तया कंतं ददं
हेजानामेव परं तु पितुर्मातुरग्रे मयानकथितं इति भार्यावचः श्रुत्वा हृष्टः । कतिपयदिनानि तत्र स्थित्वा प्रसुप्ता भार्यायै नि
त्रि आभरणानि भूषणानि गृहीत्वा केनापि लक्षितः स्वनगरं जगाम । हे राजन्निदं प्रत्यक्षं मया दृष्टं तस्मात्पुरुषाः पापिन तोरअ
कथितं सान कर्त्तव्यः । एतत्श्रुत्वा राज्ञा शुकः पृष्टः । शुकेनोक्तं ॥ वाजिवारणलोहानां काष्ठपाषाणवाससां ॥ नारीपुरुष
तोयानां अंतरं महदंतरं ॥ राजन् स्त्रियः पापिन्यः अत्र कथानकमस्ति । अस्ति कांचनपुरं नाम नगरं तत्र सागरदत्तो
नाम श्रेष्ठी । तस्य पुत्रः श्रीधरो नाम । अन्यास्मिन्नगरे समुद्रदत्त सुता जयश्री नाम्ना सा तेन परिणीता । अनंतरं स श्री

धरः नानाविधानि रत्नानि गृहीत्वा पट्टकूलकस्तूरिकादीनि गृहीत्वा पोतमारुह्य द्वीपांतरं गतः॥ तस्य भार्या जयश्रीः पितृ
गृहे यौवनावस्थां संप्राप्ता उत्कंठिता॥ इत्थंविधं ध्येयं ध्यं नकनककृतो त्रा तिमुरक्तिरथार्थं तं रचयतु मया कस्पृश मदनः॥ पदे
भूपोलुपः स्वरछति प्रविवेतुं स्थिरगतिं स्तदस्याः श्रागार्यां तरुणिमगुरुः किं प्रविशति॥ सा निजजवनोपरि स्थिता राजमार्गे
गे पुरुषान् अवलोकयंती एकं पुरुषं युवानं मन्मथमिव सुंदरं दृष्ट्वा॥ उक्तं च॥ ॐ धात्रं दृग्वीक्षणे चिवश्यतः कृपोदेवी
नवहृमिलेकुसुमापितोऽप्यजाति प्राप्तेपिवं धेयुनः॥ इच्छ भोजुजत स्तनो प्रकट नां श्रोणीतटं दृष्ट्वा पतेनी॥ वीच स्वकृति
स्थितापि सुदृढं कामेंगितं योषितां॥ स्नेहमनो रथकृतं क्षयपति भाव नादीमुंडास्तनविभूषण दर्शनानि॥ स्वस्य संयम नियंत्रि
मोक्षणानि भ्रूक्षेपकंटक कटाक्षविमोक्षणानि॥ उक्तं च॥ श्रीवनमुत्कटकं चहसितं श्वासनात्मपर्णं गात्रस्फोटनं ... निसुख
उद्ध्याद्य वादि संप्रार्थनं॥ बालालिंगनचुंबनादिरन्यानि मुखं सख्याः समालोकनं कंपनमयपरं दुःखी पुणव थाकर्णस्पर्श
यनं॥ घृतकुंभसमा नारी पुरुषो वह्निसन्निभः॥ संश्लेषादृश्यवेनोकं न स्याद्भस्त्री पुंसि जाविता॥ सुंदरं सुरूपं दृष्ट्वा सुगंधं मद्यच जिनः॥
क्लिद्यंते योनयः स्त्रीणां आमपात्रमिवांभसि॥ तदनंतरं तया दूती प्रेषिता सातं युवानं मन्मथावतारं गत्वा प्राह॥ भोमन्म

थावतार तव श्रीरूपाल सहेऽ कांते गोष्ठीं वांछति॥ मन्मथावतारेणोक्तं॥ तथैव करिष्यामि तदुक्तः आत्मा सर्वसगृहमागत्य
योषिगें कापय्यामास॥ उक्तं च॥ नानाविधाः भोगाः कृताः॥ शय्यं च कृतं रः॥ कामः समतिक्रांतः॥ कतिचित् दिने तस्या भर्त्ता धि
श्रुरगृहं समायातः॥ तं आगतं दृष्ट्वा दुःखिता चिंतायितो जवत्॥ किं करोमि कथा मिलितं मां बाधयतुं समर्थवान् पुनर्बुभुक्षां
नहि अंचरी तो लभं न वविंदति॥ सर्वेसि स्याग्रे कथितं॥ सख्योक्तं तव दोषं स्फोटयिष्यामि॥ तद्धृष्ट्या स्वच्छमानसा स्वगृहे स
मायाता॥ तदा रात्रौ भाजा व जात्कारेण प्रियस्याग्रे प्रोषिता॥ स्वकेलिदवचनानि वदंति॥ तस्यान्निजेबहुनरदुःखेहा
पिता॥ विरह चेष्टा नकुटी मुखतल पराङ्मुखत्वं कृतविस्मृतिश्च॥ असंप्रेमो दुष्यति तोष तान्य प्रदेश में त्रिपुरुष्यवाक्य
याय पराङ्मुखी भूली शयनेऽस्थितं अभीष्ट निद्रावशां ज्ञात्वा शयनात् उत्थाय सर्वकामदा च पंच श्रीपपति॥ निश्चिति अप्यावगा
त्रिता वंन्मार्गे चौरेण दृष्टा एषा सर्वाभरणभूषिता एकाकिनी कुत्र गच्छंती ति पृष्टो लग्नः॥ सा उपपतिं गता याव
व पश्यति तावत् उपपतिः सर्पेण दष्टस्तत्र मृत स्तिष्ठति॥ सा तादृश्वरूपी पिनामृतं वा मन्मथावतारं आलिंग्य॥ मुखं च
दत्तादिकं तांबूलादि सर्वं विधाय स्नेहकुतुहलेन मुखं पुनः पुनः चुंबति॥ तावत् तत्र स्थितेन ब्रह्मराक्षसेन चिंतितं॥

अस्य मृतस्य देहं प्रविश्य संभोगं करिष्यामि इति चिंतयित्वा [illegible]
मृतकशरीरे प्रविश्य भोगं चकार। ततः संभोगानंतरं तस्याः नासिकां [illegible] ओष्ठ पि आगतः। तत्सर्वं वी [illegible]
रेण दृष्टं सा च रुधिरलिप्तांगी सखीसमीपं [illegible]॥ सखी उक्ता यावद्दीपं न ददाति तावत्परिणीतभर्तुः शयनं [illegible]
त्वा मुक्तस्वरकष्टेन रोदनं कुरु तद्वचः श्रुत्वा सा समीपे गत्वा शयने रुरोद। तच्छ्रुत्वा तदीयबंधादयः सर्वेप्यागत्य [illegible]
रक त्याहुः। हे पापिष्ठ कुकर्म कुर्वन् कथं निरपराधा इयं नीता। तद्वाक्यमात्रा विजिती॥ न विश्वसेत्कुभार्यां संरक्षितु हस्तं वैदि [illegible]
आचार्यचेष्टितं चित्तं स्त्रीचरित्रं न विश्वसेत्॥ कवयः किं न पश्यंति किं न भक्षंति वायसाः॥ मद्यपाः किं न जल्पंति किं न कुर्वं
ति योषितः॥ अश्वप्लुतं माधवगर्जितं च स्त्रीणां चरित्रं पुरुषस्य भाग्यं॥ अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो म
नुष्यः॥ ततः प्रातः डोमिनी तत्र बंधः स्वगृहं गता सुहृदा॥ कारणं [illegible] दा राज्ञा धर्माधिकारी पृष्टः। तेनोक्तं॥
प्रजानां रक्षणं सम्यक् राज्ञां स्वर्गस्य कारणं॥ अरक्षन्नरकं याति तस्माद्रक्ष्याः सदा प्रजाः॥ साधूनां रक्षणं सम्य
ग्दुष्टानां निग्रहस्तथा॥ एष राज्ञः परो धर्मः परत्रेह च वाग्भवे॥ प्रजापीडनदाहकः समुद्भूतो हुताशनः॥ राज्ञ्यं

कुलं बंधूं प्राणान्दग्ध्वापि न निवर्तते। ततः स डोमिनीतावध्यस्थाने नीता॥ तावत्तस्य चौरेण राज्ञे सर्वोपि वृत्तांतः कथितः। तच्छ्रुत्वा राज्ञा मु
क्तः॥ एवं विदग्धचूडामणिनाश्चके न राजानुमुक्तं एवं पापिन्याः स्त्रियाः॥ वेतालेनोक्तं विक्रमस्य पापं वद। विक्रमेणोक्तं॥ नित्या
योषित् एव पापं न पुमांसः कदाचन॥ धर्माधर्मविचारं बुद्धिपूर्वं द्विजवर्यं नित्ये॥ इति श्रुत्वा गतो वेतालः॥ ॥ इति वेतालपंचविंशत्यां
शुकसारिका कथानकं तृतीयं॥ ॥३॥ ॥ पुनरपि राजा वेतालं गृहीत्वा चचाल। वेतालेनोक्तं राजेन्द्र॥ अस्ति वर्धमानं नाम नगरं। तत्र
शूद्रको नाम राजा। तं प्रति कस्मिंश्चिद्दिने दक्षिणापथाद्वीरवरो नाम सकुटुंबः समागात्। राज्ञो आशिर्वादं दत्वा स्थितः। राज्ञा त
स्य वर्तनं पृष्टं ज्ञात्वा शह देवि वीरवरस्य दिनपट्टिका कीदृशी तत्त्वं त्वं तत्कथय। ततः तेनोक्तं यदि जस्यं दासस्य सितद्दिमि प्रतिदिनं दं
सहस्रं नां दातव्यं॥ राज्ञोक्तं तव किं गजवाजिन संति तेनोक्तं॥ भार्यास्ति मे अहं पुत्रश्च निर्बलाः पंचमो नास्ति। सर्वेपि स
दस्यैव मन्त्रिताः स्मेर मुखाः संजाताः॥ राजा चिंतितं अनेन किम् अयं बहु धनं याचितं। परं तु धनस्य सफलं प्रायः करिष्यति। पौरा
दिह कमाङ्गुपकारिता। प्रतिदिनं वीरवरस्य सहस्रटंका देयाः॥ ततः सर्वो वीरवरः तद्धनमादाय प्रतिदिनं भोजनपर्यंतं सं
पर्याल्पाल्पेन स्थापयति। कीदृशः॥ मो नानाम्रेकः अवचनपूर्ववीत को जल्पक्रीडाशाल्यान्नी च प्रतिदिनं सदस्यप्रायश्रयन
निशाता। द्वादशः पार्श्वे निवसद्रात्रौ तस्य प्रमारी सेवायां परिमगदनो येन नामप्यगम्यः॥ एवं सति कदाचिद्दिने

श्मशानशून्यां निशीथसमये रुदत्या नार्याः सकरुणः शब्दः राज्ञा श्रुतः ॥ राज्ञोक्तं ॥ द्वारि कस्तिष्ठति । तदा वीरवरेण द्वारि स्थि-
तस्तेनोक्तं । अहं वीरवरनामा । देव वीरवर रुदंत्याः नार्याः शब्दमहं शृणोमि । तद्विलस्याः समीपं गत्वा । कस्य कारणाद्वि-
लाप शीघ्र मार्गेतव्यं । वीरवरस्तथेत्युक्त्वा तत्र गतः ॥ नारीं उवाच । कात्वं विलपसि तयोक्तं अहं राज्यलक्ष्मीः ॥
तेनोक्तं । त्वं यदि राज्यलक्ष्मीः तर्हि कथं रोदिषि तयोक्तं हे पुरुष श्वः तृतीयप्रहरे राजा मरिष्यति । राज्यमनाथकं
भविष्यति । तेन दुःखेन रोदनं करोमि । तद्वचनं श्रुत्वा वीरवरः स्वस्थमनाः तां पप्रछ । अस्ति कोप्युपायो राज्ञो जीवितस्य त-
र्हि कथय ॥ तयोक्तं । यदि त्वं निजपुत्रस्य शिरः छित्वा ददास्यसि तर्हि राजा न मरिष्यति । एवं श्रुत्वा वीरवरः निजभवनं यातः ।
तदा भार्यया वीरवरः पृष्टः । हे प्रिय त्वं कथं रात्रौ भ्रमणं करोषि । तदा वीरवरेण सर्वोपि वृत्तांतः कथितः ॥ सुहृदि निरंतरचि-
त्ते गुणवति भृत्ये प्रियासु नारीषु ॥ स्वामिनि शक्तिसमेते निवेद्य दुःखं सुखी भवति ॥ ते पुत्रा ये पितुर्भक्ताः स पिता य-
स्तु पोषकः ॥ तन्मित्रं यत्र विश्वासः सा भार्या यत्र निर्वृतिः ॥ पुत्रोपि शास्त्रार्थकरो विद्या आरोग्यता मित्रसमागमश्च ।
भार्या विनीता प्रियवादिनी च ह्येते कृत्स्ने सुखपणानि षड् वा ॥ आत्मनीयोनृत्यजनो नृपतिरदाता राजानिमित्राणि । वि- १२
नयविहीना भार्या मत्तकभृत्यानि चत्वारि ॥ भार्या मितं ददाति हि मितं माता मितं सुतः ॥ अमितस्य च दातारं भर्ता-

रं का न पूजयेत् ॥ न दाने शुध्यते नारी नोपवासशतैरपि । न तीर्थसेवया तद्वद् भर्तुः पादोदकैर्यथा ॥ अंधकं कुब्जकं चैव
कुष्ठांगं व्याधिपीडितं ॥ अशक्तं द्रव्यहीनं न त्यजेत महासती ॥ त्यजेत्पुत्रं च मित्रं च पितरौ च गुरुं तथा ॥ अभ[illegible]
च भर्तारं न त्यजेत महासती ॥ पुत्रेणोक्तं । हे पितः मात्जीवितेन राजा जीवतु । इति पुत्रवचः श्रुत्वा [illegible]
त्रस्य शिरः चिच्छेद । अनेन शिरसा देवेन राजा स्तु गच्छतु । पुत्रस्य भार्यापि प्रियं मृतं दृष्ट्वा [illegible] छुरि-
कया निजोदरं विदार्य ममार । माता च पुत्रशोकेन प्राणान् जहौ ॥ तदा वीरवरेण चिंतितं । यस्य मे कुटुंबं क्षयं गतं तस्य
वीरवरस्य जीवितेन किं इति चिंतयित्वा छुरिकया स्वशिरः चिच्छेद । सर्वोपि वृत्तांतः राज्ञा श्रुतः । राजापि तं दृष्ट्वा चिंति-
तवान् । मदर्थे एतस्य कुटुंबक्षयः संजातः । मम राज्येन प्रयोजनं नास्ति । उक्तं च ॥ राज्येहि सुमहद्दुःखं संधिविग्रहचिंतया । पु-
त्रादपि भयं यत्र तत्र सौख्यं हि कीदृशं ॥ छुरिकामादाय यावद्राजा शिरच्छेदं करोति । तावद् देव्या [illegible]
उक्तं ॥ हे पुत्र तव वरं ब्रूहि । राज्ञोक्तं । हे मातः यदि तुष्टासि तर्हि इमानि मम [illegible]
वीणि संजीवितानि ॥ उक्तं च ॥ लक्ष्मीः दाता गुणग्राही स्वामी पुण्येन लभ्यते [illegible]

पितुर्लज्जः ॥ प्रत्यूषावसरे वीरवरसकुटुंबं जीवितं दृष्ट्वा हृष्टो राजा तस्मै वीरवराय राज्यार्द्धं ददौ ॥ स हृष्टः उज्ज्वलं तिराज्ञानः सकुडु
ल्यं निपेडिता ॥ स कोतत्न्यायदीयते नृपेणेतानि सकुल्ससहस्र ॥ एवं कथानकं कथयित्वा वेतालेनोक्तं ॥ राजन्नत्र अमीषां मध्ये
कः सत्वाधिकः ॥ ज्ञात्वा न कथयसि तदा महापापं प्राप्स्यसि ॥ तदा राज्ञोक्तं ॥ राजा सत्वाधिकः ॥ कथं भृत्याः स्वामिकार्ये
प्राणान्नूत्सृजंत्येव ॥ परं राज्ञा भृत्यार्थे प्राणत्यागो व्यवस्थितः ॥ अतः राजा सत्वाधिकः ॥ एवं श्रुत्वा गतो वेतालः ॥ ॥ इतिपं
वीरवरकथानकं चतुर्थं ॥ ॥ विघ्नेश्वरं महाकायं गजवक्त्रं त्रिलोचनं ॥ अथ धौपावती पुत्रं नमामि गणनायकं ॥ अस्ति उज्जयनी ना
मनगरी ॥ तत्र राजा महाबलो नाम ॥ तत्र संधिविग्रहकर्त्ता ब्राह्मणो हरिदासः ॥ तस्य सुता मंदाकिनी नाम वरयोग्या जाता ॥ तस्या यौवने
दर्पितः यस्य सम्यग्गुणाः तस्मै अहं देया ॥ तदा हरिदासो दक्षिणाधिपस्य समीपे वरविलोकनाय गतः ॥ ततो राजगेहे स्थ
विग्रहे गतः राजदर्शनं जातं ॥ राज्ञोक्तं ॥ विप्र कलिकालानुरूपं पठ ॥ कालः संप्रति वर्त्तते ॥ कथिरसौ सत्यं धिकारु दशा
दृश्यं गताः ॥ कलौ नाशं गताः पार्थिवाः ॥ नाना चोरगणा मुष्णंति पृथिवीं आर्यो जनः संक्षयं नीतः पुत्रं न पिता विभर्त्ति
तिपितरः कष्टं युगे वर्त्तते ॥ धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं च दूरं गतं पृथ्वी मंदफला नृपाः कपटिनो लौल्यं गता ब्राह्मणाः

श्री २८

नार्यो यौवनगर्विताः परस्ताः पुत्राः पितुर्द्वेषिणः साधुः सीदति दुर्जनः प्रभवति प्राप्ते प्रविष्टे कलौ ॥ तत्र स्थितेन ब्राह्मणेन क
न्यायाचिता हरिदासेनोक्तं ॥ यस्य सम्यग्गुणा विद्यंते तस्मै कन्या दास्यामीति एवं प्रतिज्ञातं ॥ तत् श्रुत्वा विप्रेणोक्तं मम
पि संति सम्यग्गुणाः ॥ हरिदासेनोक्तं संति चेत् तर्हि कथय दर्शय ॥ तदा तेन स्वहस्तेन रथो घटितः ॥ दर्शितश्च ॥ अयं रथ आका
शमार्गेण गच्छति ॥ तत् श्रुत्वा तत्र यथेत्युक्त्वा द्वावपि तेन रथेन आकाशमार्गेण स्वनगरं प्राप्तौ ॥ यथाहं शार्य हरिदासो यावद् गृहं गतः
तावत्तस्य पुत्रेण भगिनी कस्मैचिद् ब्राह्मणाय दत्ता ॥ तेन ब्राह्मणेन हरिदासं प्रत्युक्तं अहं शास्त्रवेधी ॥ तदा हरिदासेन विवाह
संभारः कृतः तां कुमारीं सम्यग्गुणयुक्ताय प्रतिज्ञातां श्रुत्वा अपरोपि वरः समागतः ॥ स सहोज्ञानी एवं त्रयो वराः मिलिताः
एका कन्या ॥ सर्वेपि परस्परं चिंतोद्विषादयुक्ता बभूवुः ॥ एवं सति लग्ना पूर्वदिने रात्रौ तस्याः तैलारोपणं कृतं सा नि
द्रिता तां अतिसुंदरतरां जनमनोहारिणीं दृष्ट्वा विंध्याचलस्थो राक्षसः तां अहरत् गुहायां ॥ ॥ अतिरूपात् हृता सीता अति
गर्वेण रावणः ॥ अतिदानाद्बलिर्बद्धो अति सर्वत्र वर्जयेत् ॥ प्रातः सा द्रष्ट्वा यावत् हरिदासः कन्यां पश्यति तावत्तु पलने न दृष्टा
इदानीं क्व गता इति दीर्घस्वरेण जल्पति ॥ सर्वेपि परस्परं पिताद्य विह्वलीभूताः ॥ अत्र त्रयाणां वराणां निकटमागत्य ज्ञानिना उक्तं
हरिदासेन यदि ज्ञानवान् ज्ञानिना तर्हि मत्कन्या केन नीता ॥ विप्रोक्तं ॥ स्वामिन् विंध्याचलवासिना राक्षसेन नीता ॥

नथौक दाग्रा श्वे धीरः कथमानेयाइति तेनोक्तं । अहमानयिष्यामि परं मार्गो विषम ॥ नअमनुष्याणां गतिः कवि
नात्तनीये नोक्तं मदीयेना काशगामिना रथेन गच्छेति । तच्छ्रुत्वा शास्त्रवेधी खड्गपाणिः स रथमारुह्य तत्र गत्वा राक्षसा
न्राक्षसं व्यापाद्य तां सुंदरीं रथमारुह्य गृहमानयत् । तदर्थं त्रयो वराः विवादं कुर्युः मदीया भार्येति । वेताल नृविक्रम
साकस्य भार्या भवति त्वं मह्यं निश्चितं कथय ॥ राजा प्राह ॥ शूर शास्त्रविधाविशारदस्य भार्या युक्ता । वेतालेनोक्तं । राज
न्नूसर्वेपि विशिष्टगुणाः कथं तस्यैव । राज्ञोक्तं उपकारे भूतौ द्वौ । अथमं साहसं धैर्यं शक्ति बुद्धि पराक्रमो ॥ षड्वेते य
स्य तिष्ठंति तस्य देवोपि शंकितः ॥ परवधूलुंठितामहादोषध्यरण निबद्धमिदं न भोगणां ॥ निजसदन समरं सातद्वं भवति
न्नृणां व्यवसायशालिनां ॥ एवं श्रुत्वा गतो सौ वेतालः ॥ ॥ इति वेतालपकथनकं पंचमं ॥ ॥ अस्ति धर्मपुरं नाम नगरं
तत्र धर्मसेनो नाम राजा । तस्य मंत्री श्रीधरः । तेनोक्तं । देवतव राज्यधरः पुत्रो नास्ति । किं न राज्यसुखेन च ॥ अच्छायः
पुष्पितकुसुमः फलेन रहितो द्रुमः ॥ पथ्येकश्चैकशाखश्च अपुत्रो हितथा नरः ॥ तस्माद्देवी मामाराधय ॥ तन्मंत्रिणो वचः श्रु
त्वा चिंतयामास पार्थिवः । देव्याराधनमेव श्रमं वै पुष्पैर्मनोरमैः ॥ न नामि देवदेवेशां वंदितां त्रियुगमुत्तमां ॥ प्रसाद मयं
द्रीपयामहाकालस्मि नमोस्तुते ॥ जयदेवि महादेवि चंडमुंडे मुंडमर्दिनि ॥ चंडघंटा पुत्रीरेचंडयोगिनि तेनमः ॥ तुष्टा देवी रा १३

राजानं प्रत्यक्षीभूत्वा प्राह ॥ तुष्टाहं तव राजेंद्र वरं ब्रूहि ... कस्मिन्नपि पंच यदिलं देवि तुष्टासि पुत्रं देहि मेनोक्त आत्मण
देवी तथेवांतरधीयत ॥ राजापि पुत्रं अचिरात् लेभे देव्याः ... एवं सा देवी नगरस्य सर्वेषां कामद संग्रामे
वेश्यत्वा अन्यदेशात् कश्चन राजपुत्रः मित्रेण सहितस्याः दर्शनार्थं समागतः । तत्र श्रीडार्थं एका राजकन्या नामि व
रूपिणीं दृष्ट्वा राजपुत्रः देवी विज्ञापयामास देवि मातः इमां मदीयां भार्यां यदि तु विधास्यसि तदा स्वशिर ति ॥ यपु
छित्वा पूजां करिष्यामि । एवमुक्त्वा यामं गतः । तदा च नृपतिर्विद्धि रहषेदनयाप्यद्दितः आसीत् । तस्यितापुत्र नयपंडिताः
स्य पत्रं । पुत्रः कोसि ति ... तदा तेन मित्रेण ... सर्वोपि कथितः । तच्छ्रुत्वा पिता तां कन्यां याचि यमुक्ता
या पिता पुत्रस्य विवाहं कृत्वा पुत्रः श्वशुरगृहे स्थाप्य स्वनगरं यातः । राजपुत्रः कतिपयदिनानि श्वशुर सर्वेषां ल
वोढामादाय मार्गे स्वगृहं गच्छन् तां चंडिकायतनं ददर्श । दृष्ट्वा पूर्वप्रतिज्ञातं सस्मार । तदा स्त्रियं मित्रे स्थलायां पु
स्थाप्य चंडिकायतनं गतः । ततः छुरिकया स्वशिरः छित्वा देव्या अग्रे पातयित्वा । मित्रोपि चिंतयत्यादेव्या गतो रोचे
मितिविलंबः कृतः । इति चिंतयित्वा यावद्देवतायतनं गत्वा पश्यति तावद्राजपुत्रः मृतोस्ति । तदा दुःखितः सन् यस्य सादा
हासिष्यंति निर्दोषं कृत्वा निष्कासमिति वालकेन मित्रो व्यापादितः । इति तेनापि स्वशिरः छिन्नं । अपि राजसभामावा
जा इदं आख्यद्

आगत्य देवतायतनं यावत्प्रविशति तावत्ततो अपश्यत्। साप्यचिंतयत् अहमपि मरिष्यामीति। णागतिः कवि
ते पाशमारोपयति तावद्देव्या कृपया उक्तं। हे बाले तुष्टाहं वरं ब्रूहि तयोक्तं। यदि तुष्टासि तर्हि भाव गत्वा स्वशि
शिरसि कबंधेन संयोजयतो। सा च अज्ञाला मित्रशिरः भर्तृकबंधे योजयामास। भर्तृशिरः मित्रकबं तेन
प्रसादात् द्वावपि उत्थितौ। एवं कथानकं कथयित्वा वेतालेनोक्तं॥ राजन् सा कस्य भार्या। राज्ञोक्तं॥ श्रेष्ठं। राज
सर्वेंद्रियाणां नयनं प्रधानं॥ इत्येषु सर्वेषु जलं प्रधानं सर्वस्य गात्रस्य शिरः प्रधानं॥ एवं श्रुत्वा गतो से। डितो य
व कथानकं षष्ठं॥ ॥ अस्ति चंपावती नाम नगरी तत्र चंपकेश्वरो नाम राजा प्रतिवसति स्म तस्य राज्ञी भवति
भुवनेश्वरी॥ नाम तिसुंदरी विवाहयोग्या दृष्ट्वा कायो वन दृष्टापितात्तस्याः सन्ति चोरा राजकुमारान् भणत तन्नगरे
ये तेतयोक्तं पितः तया चिंतितं मम कोपि न रोचते। तत्कुलाः स दिसमग्र तां वाच। पुत्रि तर्हि स्वयंवरं कुरु छलपः
तत्तान् नव। तयोक्तं पितः यस्य त्रयो गुणा भविष्यन्ति तस्याहं दास्यामी रूपं बलं ज्ञानं चेति पत्र गुणत्रय चाः श्री
तावत् आत्ता राज्ञा ऐश्वर्यसंपन्नः सर्वान् राजपुत्रान् आव तदा पूर्वस्याः दिशः एकः वरः स दनसं देवीरा
सर्वांगसुंदरः सकलकलाप्रवीणः साक्षान्मन्मथ दर्ने। चंडर्पदः वरः। एतस्मिन्नंतरे दक्षिणस्या १३

याताः। राज्ञोक्तं। कथयतो निजगुणान्। एकेनोक्तं। अहमेकस्मिन्दिने पंचशतानि साधयिष्यामि। एवं दश्यामि ब्राह्मण
पवित्रीयं देवाय। हर्ता यत्स्त्रीं गे धारयामि। चतुर्थं भार्यायै। एवं मम विक्रयं कृत्वा जोज ना दिन संपादयामि। मम संग्रामे
द्वितीयो नास्ति। रूपं मे प्रत्यक्षमेव पश्य॥ द्वितीयेनोक्तं॥ अहं जलचर स्थलचर प्राणिनां सर्वेषामपि वचनरूपज्ञा नामि। बु
लेन मत्समो नास्ति रूपं प्रत्यक्षमेव पश्य॥ तृतीयेनोक्तं॥ अहं शास्त्रपरीक्षां जानामि। बलेन मया समो नास्ति॥ चतु
र्थेनोक्तं॥ अहं शास्त्रपूर्णिजानामि प्रत्यक्षमेव रूपं पश्य। इति सर्वेषां वचांसि श्रुत्वा राज्ञा चिंतितं। सर्वे गुणत्रयपंडिताः
समयाता। कस्य भार्या भविष्यति। तदा सा कन्या सती प्रतिवचनं दत्तवती राजन्न्यस्मै चालदेहि। एवमुक्त्वा
वेतालेनोक्तं कस्मै कन्या देया॥ कोवा गुणाधिकः तस्मै वक्तुं हि। राज्ञोक्तं॥ यः पंचशतानि साधयति स गोडः। सर्वेषां व
रूपं जानाति स ब्राह्मणः॥ शास्त्रपरीक्षां जानाति तृतीयो वैश्यः। शास्त्रपरीक्षां जानामीति चतुर्थः क्षत्रियः तस्य सा योग्य
का। उक्तं च॥ वरयेत्कुलजां कन्यां गुरूणामपि कन्यकां सुरूपान्वितां च रूपाढ्यां विवाहः सदृशो कुले। एवं श्रुत्वा आगतो सौ वे
ताळः॥ ॥ इति वरचतुष्टयकथानकं॥७॥ ॥ नमामि शारदां देवीं वीणापुस्तकधारिणीं॥ सनागैः राजहंसस्थ सप्रसादा
द्विधीयेत॥ अस्ति गुणवती नाम नगरी॥ तत्र गुणाकरो नाम राजा। तद्द्वारि वीरवरो नाम सभापालः। स राजसेवां
सर्वदा गाढी करोति परं चिह्नमानीतं तत्सर्वं विलंबेन व्ययी करोति निर्धनो जातः। एकस्मिन्दिने राजा आखेट

कं गतः॥ पुनर्जनः सकोपि रामाने विहाय दूरतरं गतः॥ तत्र राजा मार्गं न विंदति। राजा चिंतितं। कथं स्वनगरे गमिष्यामि इति
यावत् चिंतयति तावद्धिरवरेण आगत्य राज्ञे नमस्कृतः॥ राज्ञोक्तं॥ कथं मित्रसमागमस्तव। तेनोक्तं॥ देव तुरगपृष्ठे अहं भवन्
मतः॥ किंच॥ ॥ वर्षा नैव पतंति शीतात् कमुखमेघस्य किं दूषणं नोलूकोपि विलोकते यदि दिवा सूर्यस्य किं दूषणं॥ पत्रं नैव
यदा करीरविटपे दोषो वसंतस्य किं यद्धात्रा निजभालपट्टे लिखितं तन्मार्जितुं न क्षमः॥ वरं हालाहलं पीतं सद्यः प्राणहरं
विषं॥ न दुष्टधनाढ्यस्य भ्रूभंगकुटिलं मुखं॥ ध्यात्वा स विवित्वम कारणकार्यं स्त्रीपुत्रविवादमसज्जनसेवा। मर्दनयान
मसंस्कृतवाणी एवं नरो लघुतामुपयाति॥ आयुः कर्म च वित्तं च विद्या निधनमेव च॥ पंचैतानि विलिख्यंते गर्भस्थस्यैव देहि
नः॥ तच्छ्रुत्वा राज्ञोक्तं। धीरो भव तुष्टोऽहं। तेनोक्तं। नाहं चोत्तरं जानामि। मया कुत्रचित् हा भवत्कार्यं लक्ष्मास्ति गृहाण। त
द्दत्वा राज्ञा न क्षितं। ततस्तेन सेवकेन राजा स्वनगरं नीतः। तत्र तस्य सेवकस्य दिनपट्टिका कृता॥ अन्यस्मिन् दिने राज्ञा
देशांतरं वर्जितं॥ यावत् समुद्रतीरं गच्छति तावदेकं देवतायतनं दृष्टं। तत्र देवीपूजार्थं एका नारी समायाता। तां दृष्ट्वा तस्याः पृष्ट
तोलस्य। तयोक्तं। किमर्थं आगता। देवतानमस्कारार्थं आगता। राज्ञो रूपं दृष्ट्वा सानुरागं सा वदति राजन्। तव किं मे दया। पत
किमपि तन्न सितं कल्यं न कृत्यं वा करोमि। राज्ञोक्तं॥ यदि मम वचनं करिष्यसि तदा मम सेवकस्य भार्या भव। तयोक्तं॥ रा
जन् त्वय्यहं सानुरागा कथं मम सेवकस्य भार्या भवामि। राज्ञोक्तं॥ त्वया पूर्वं अकृत्यमपि करोमीत्युक्तं तस्मा १५

सेवकः॥ वेतालेनोक्तं राजन् विक्रम दिव्यांगनी [illegible] आसेवकाय दत्त्वा कथं न सत्त्वाधिकः। राज्ञोक्तं २

दस्य भार्या भव। तया तथेत्युक्त्वा अंगीकृतं। तेन सेवकेन सा परिणीता॥ एवमुक्त्वा वेतालेनोक्तं द्वयोर्मध्ये कः सत्त्वाधिकः॥
राज्ञोक्तं। येन प्रथमं उपकारः कृतः स सत्त्वाधिकः। उक्तं च॥ उपकारिषु यः साधुः साधुत्वे तस्य को गुणः॥ अपकारिषु
यः साधुः स साधुः सद्भिरुच्यते॥ इत्याकर्ण्य कथं न सत्त्वाधिकः॥ राज्ञोक्तं॥ सेवक एवं श्रुत्वा गतो वेतालः॥ ॥ इति सेवककथा
नकं षष्ठम॥ ॥ प्रणम्य परया भक्त्या हंसस्कंधां सरस्वतीं॥ तस्याः प्रसादमासाद्य विदधामि कथानकं॥ ॥ अस्ति मद
नपुरं नाम नगरं। तत्र राजा मदनशेखरो नाम। तत्र हिरण्यदत्तो नाम वणिक्। तस्य सुता मदनसेना। सा वसंतोत्सवे क्री
डार्थमुद्यानं गता। तत्र सोमदत्तसुतः धर्मदत्तो नाम मित्रेण सह संप्राप्तः। तां दृष्ट्वा तद्रूपलावण्यमोहितः। एषा मम कार्ये भवि
ष्यति चेत्तर्हि जीवितं सफलं। इति चिंतयन् विरहवेदनपीडितः गृहमागतः। प्रभाते पुनरुद्याने आगतः। पुनरपि सा सखीभिः
क्रीडनाय तत्र गता। सोमदत्तसुतेन मदनातुरेण करेण गृहीत्वा तामुक्तं। त्वं यदि मम भार्या न भविष्यसि तदा हि बलात्का
रं करिष्यामि॥ कस्तूरीतिलकं भाले नेत्रे मल्लि विराजसे॥ भ्रूलताचापमासाद्य नयनेन हनिष्यसि॥ अपूर्वेयं
धनुर्विद्या मन्मथस्य महात्मनः। शरीरमक्षतं कृत्वा भिन्नमंतर्गतं मनः॥ योषितां नयनसायकेन [illegible] सुहृद्व्याप
निगदेत्॥ वांछितानामकरं च कुनाहतः। कस्य नोपतति नो मनो [illegible]॥ तयोक्तं॥ अद्य कन्या मम विवाहसंजाते पंचमे दिने मां
आलिंग्य प्रथमसंभोगं करिष्यामि॥ किं मुकुलस्य क्रियते मानायक। संगता [illegible] पतिर् हत्या प्राप्य [illegible]

दृश्यपत्तनकुटिरे तद्दृश्यमाने स्मरायेनो निमग्नचित्तं यावो वैशिकः पंडितोपि ॥ तया शपथं कृत्वा गृहं गता ॥ तावत्तयोः ॥
विवाहे संजाते निशीथसमये तद्भर्ता यावदालिंगनं कर्तुमुद्यतः तावत्तयोक्तं ॥ हे प्रिय प्रथमसंकेते मया कुमारिकयैव
सुमदत्तसुताय प्रतिज्ञातं ॥ तर्हि मम आज्ञां देहि तच्छ्रुत्वा स विस्मयश्च प्रियामुवाच ॥ प्रिये गच्छ तत्र राज्ञि गच्छ लासा
अतिसुंदरतरा काचिद्दृष्टा पन्नग्याणि गृहीत्वा भूषणैर्युक्ता मार्गे यावद्गच्छति तावत्तत्र चौरेण दृष्टा । चौर आभरणानि
दृष्ट्वा हृष्टमना सुवर्णादि प्रयच्छतीति तां निकषा चौरः घने निशीथे आगच्छतीत्येवमालोचनपरः प्रियो मे एकाकिनी वद कथं नावि
नो वियोगविरहेन वल्लिपुंखित तत्र रतिमदनः सहायः ॥ तया भर्तुरपि हि वृत्तांतः चौरस्य कथितः ॥ तच्छ्रुत्वा चौरेणोक्तं ॥ त्वदुक्तं भर्तुं
परं अहं शृंगारार्थी ॥ तां कथं त्यजामि ॥ तयोक्तं मे शृंगारसंगं मा कुरु ॥ यथा तस्मै जोगीदत्वा पुनरागमिष्यामि नाथो भू श्री
द्रागेति ॥ चौरेण आभरणं गृहीत्वा सा मुक्ता ॥ सापि वसंतदत्तसुतस्तिष्ठति तत्र गत्वा द्वारस्थेन गंधर्वायाः किंचि २६
त्ले: ससंभ्रमतत्कायतांतवाच ॥ प्राह्मणी वाथवां ब्रवीकिं नवो बालुरंगान ॥ ऋषिकन्या थसिक्षावा निशावर्णयथवानी ॥
हिरण्यदत्तसुता मदनसेनाहं ॥ यत्प्रथमं मया बाल्यकारणात् [illegible] पयोगृहीतः साहं तदर्थं यथा स्वेच्छया कुरु ॥ तेनोक्तं हे
कामिनि त्वया सत्यं समीपे अर्थं वृत्तांतः कथितो वा नवा ॥ तयोक्तं ॥ सर्वमपि भर्तुः पार्श्वे कथितं ॥ तेनोक्तं तर्हि परस्त्री
त्वं मया न गृह्यते ॥ अहमपि तव यशील ॥ ॥ मंत्रहीनमयं कार्यं घृतहीनं तु भोजनं ॥ स्वरहीनं च गांधर्वं भावहीनं तु मैथुनं ॥ ॥

र्जो हरति सर्वस्वं शाणानपि विरागिता ॥ अहो रागविरागिण्योः नष्टाः काष्ठा बलु त्रयः ॥ यत्ताहसंप दत्यायं यदकार्यं यद्
कर्म ॥ स्त्रियस्तदेव कुर्वंति तस्य स्थाने कथं रतिः ॥ अंतर्विषमया ह्येताः बहिश्चैव मनोरमाः ॥ गुंजाफलसमाकारास्तस्मात्कन्याः
सदा स्त्रियः ॥ जल्पंति सार्धमन्येन एकेन च सविभ्रमं ॥ हृदये चिंतयत्यन्यं प्रिया को नाम योषितां ॥ यदंतस्तन्न जिह्वायां
यज्जिह्वायां न तद्बहिः ॥ यद्बहिस्तन्न कुर्वंति विचित्रचरिताः स्त्रियः ॥ कृमिवन्नादेयचिन्हेन रेणुस्थाने चौरेण योषिता ॥ उद
रेणापि विधृतं धनं तिपुत्रं अकोपिता ॥ चतुरे निर्मिता पूर्वं न पापात्तेन वै ध्रुवं ॥ नस्त्रष्टः पंचमः ॥ को विश्वसेत्तेन योषितां ॥
एवं विचिंत्य तेन परस्त्रीति वर्जिता ॥ पुनश्चौरसमीपमागता सा सर्वोपि वृत्तांतः कथितः ॥ तृषपानिरहणे तु मे चौरेणापि
एषा सत्यवादिनीति मुक्ता ॥ पुनर्भर्तृसमीपं गता सर्वोपि वृत्तांतः कथितस्तेनापि स्नेहेनालिंगिता ॥ कोकिलानां स्वरो रूपं
नारी रूपं पतिव्रता ॥ विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनां ॥ एवं कथानकं कथयित्वा वेतालेनोक्तं ॥ राजन् विक्रम एतेषां म
ध्ये कः सत्त्वाधिकः ॥ तेनोक्तं चौरः ॥ स्वपतिर्मुक्त्वा अन्यत्र गता अन्येन परस्त्री मुक्ता ॥ चौरस्यालरणे प्रयोजनं तेनापि मुक्ता
अतश्चौरः सत्त्वाधिकः ॥ इति श्रुत्वा गतो वेतालः ॥ ॥ इति भार्याचौरकथानकं नवमं ॥ ॥ विक्रमोपि पुनर्हार्थमत्राधारतया
स्थितं ॥ वृद्धा आह महं वंदे धरणीरूपमीश्वरं ॥ ॥ अस्ति गौडदेशे वर्धमानं नाम नगरं तत्र राजा गुणशेखरो नाम सकलवित

वसंतसमये महोत्सवे तिस्रो राज्ञ्यः गृहीत्वा यवक्रीडां हृदयासमर्पयति तावत्पादयो रुपरि पतितं। भग्नेन तस्य पादो
द्वितीया राज्ञी चंद्रकिरणैः संश्लिष्टा भ्रांति शरीरस्फोटः संजातः। तृतीया राज्ञी दूरस्थस्वमध्ये मुशलशब्दं श्रुत्वा तस्य
शब्दं श्रुत्वा उंदरस्तयो वेदनायुक्ताऽभवत्। एवं कथयित्वा वेतालेनोक्तं त्वं स्वकथानमध्ये कासु कुमारी नलोकथय। राज्ञोक्तं। य
रा०ड़ दूरस्थोपि शब्दं श्रुत्वा वेदनायुक्तो जातो सात्व कुमारी॥ तच्छ्रुत्वा पुनर्गतो सो वेतालः॥ ॥इति पं० त्रय स्त्रीणां कथानकं दशमं॥१०॥
॥ प्रणम्य शिरसा देवं महादेवमुमापतिं॥ कुतूहलात्र वक्ष्यामि यत्केनाप्युदाहृतं॥ ॥आसीत् गुणाकरं नाम नगरं तत्र गुण
वल्लभो नाम राजा। तस्य मंत्री प्रज्ञाकोशो नाम। तस्य भार्या लक्ष्मीः। तेन मंत्रिणा हृदि चिंतितं। राज्ञः किं प्रयोजनं यद् अहर्निशं स्त्रीभिः
सह क्रीडते तेन राज्यभारो मयि समर्पितः। लक्ष्म्योक्तं। स्वामिन् सांप्रतं त्वं दुर्बलो दृश्यसे। मंत्रिणोक्तं। अहर्निशं राज्यचिंता
मम संजाता। राजा कामिनीभिः सह रमते। भार्ययोक्तं। तर्हि राजानं विज्ञाप्य तीर्थयात्रां गच्छ। राजानं प्रति विज्ञप्ते सति ते ७
न तीर्थयात्रायां प्रेषितः। श्रीरामेश्वरं नमस्कृत्य यावद्गच्छति तावत्समुद्रमध्यात् एकः कल्पवृक्षः कांचनमौक्तिकैः रत्न
शाखा प्रदीपितः। मुक्ताफलपुष्पसंयुतः प्रवालपक्वफलसंपूर्णः दृष्टः। तस्मिन् वृक्षे पर्यंकोपरि दिव्या कांचननारी ह
स्ते वीणां गृहीत्वा गायंती दृष्टा॥ पूर्वजन्मार्जितं यच्च कर्म पुंसो शुभाशुभं॥ तदेव सर्वेषां तेषां संहारकारकं॥

एवं पठित्वा सा निमग्ना। इति कौतूहलं मंत्रिणा दृष्टं। मंत्री देवतां नमस्कृत्य स्वगृहं गतः॥ असंभाव्यं न वक्तव्यं प्रत्यक्षं यदि दृश्यते॥ य
था वानरसंगीतं यथा वारितरेच्छिला॥ प्रागवृत्तांतः सर्वोपि राज्ञः संनिधौ कथितः। तच्छ्रुत्वा राजा पुनर्मंत्रिणि राज्यं विधाय एकाकी
समेश्वरं स्वयं द्रष्टुं तीर्थं गतः। यावद्गच्छति तावत्कामिनीसहितो वृक्षो दृष्टः। तस्मिन् वृक्षे उत्पतितः। कामिन्या प्रदृष्टः। तयोक्तं भो वी
र किमर्थमिहागतः। राज्ञोक्तं। त्वद्रूपमोहितोहं। तयोक्तं। यदि कृष्णचतुर्दश्यां मया सह भोगं न करिष्यसि चेत्तर्हि स्नेहं कुरु॥
समायाता कृष्णचतुर्दशीति रात्रौ न समागंतव्यं। राजापि खड्गं हस्ते गृहीत्वा यावत्तिष्ठति तावद्राक्षसेनागत्य सा गिलिता॥
करवालं करे कृत्वा राजा प्रधावति तावद्राक्षसो दृष्टः। भो राक्षस पापिष्ठ स्त्रीघातक अस्मदीयं जीवितं आदाय कुत्र गच्छसि। मया
सह संग्रामं कुरु॥ तावद्रूपस्य कीर्तिं वा यावद्रूपमनागतं॥ आगतं च भये दृष्ट्वा प्रहर्तव्यमशंकितैः। राक्षसं व्यापाद्य उदरादंगना
आकर्षिता। तयोक्तं। साधु त्वं महावीर महानुपकारः कृतः॥ त्वं केवलं मानुषो न किं गंधर्वोसि। साधवो निंद्यं चेन्न
चंदनेन वने वनं। तेनोक्तं केन कारणेन। चतुर्दश्यां पर्वतं राक्षसेन नीता। तयोक्तं। मम पिता विद्याधरोस्ति। अहं तस्य दुहिता
मल्लिकां विना भोजनं न करोति। एकस्मिन् दिने भोजनवेलायां अहं नागता। कुपितेन पित्रा शापो दत्तः। त्वां कृष्णचतुर्दश्यां घोरा
क्षसो व्यापादयिष्यति। मयोक्तं तात अनुग्रहं कुरु। तातेनोक्तं मनुष्यः कोपि राक्षसं व्यापादयिष्यति। तदा त्वं शापान्मोक्षं गमिष्यसि
अधुना मम स्थानं गम्यतां। तर्हि पितुर्नमस्करणार्थं गमिष्यामि। पुनरपि आगमिष्यामि। इत्युक्त्वा निजां विद्याधरविद्यां
५

तस्मात्स्वर्गं गता। यस्मिन्नगरे नामागतोऽहं ... पिसुद्दह्यद्धवः सो त्वाहा संजाता। कतिपयदिनैः राजाप्यचिंतयत्। नागताके
न कारणेन अन्यासक्तो न विष्यति मया वृथैव मारि ॥ तद्धिंतयाराजा ... राज्यचिंतया राजमंत्री आणानूजेहो। ततवेताळेनोक्तं
मंत्री कस्मान्ममार। राज्ञो रक्षे। राजा देव्यासक्तो न विष्यति राज्यं गयोगमिष्यतीति ॥ अविद्वान्पुरुषः ... न्यथापि स्त्रियाऽ
त॥ निराहारस्तथाशोच्योराज्यं शोच्यं हा राजकं॥ इति श्रुत्वा गतो वेताळः॥ ॥ इति प्रज्ञाके शाकथानकं एकादशं॥ ॥श्री॥
अस्ति शूद्रपुरं नाम नगरं तत्र चूडामणि नाम राजा। तस्य पुत्रो देवस्वामी। तेन ईश्वरभट्टारकसुतादेवकन्यासमाना परिणीता। तयोः
परस्परप्रीतिः संजाता। कदाचिद्वसंतोत्सवे चंद्रकिरणेषु पतितेषु ... संभोगं विधाय बहिः सुप्तो। तत स्त्रीविवस्त्रांदृष्ट्वा
गगनगामी कश्चन विद्याधरः तां वायुणा गृहीत्वा जगाम यावत्प्रातः प्रबुद्धस्तावत् शांनपश्यत्ततः स सोऽभ्रमः क्व गता येन
प्रियेति सर्वं तीर्थं गवेषितं। कुत्रापि न दृष्टा ततः निज भवनं गत्वा अन्यां अपश्यं हृत्खुबाच ॥ अंगं मध्यमसंपयोधरसं ... प्र।
समानः स्मितैः वृणपाणिपदाधरोष्ठसदृशानेत्र वनिद्राक्षस्यात् ॥ श्यामो लाञ्छनसौम्यतां अतां गतावेणी समानं मन सर्वेषा १८
यव ... स्वरं गद्गदस्त्व का ता दिपुरुकस्यमे॥ हा कान्तिन्यं हृदयं मम प्रियेणां विहाय क्व गतासि देहि मे प्रति वचनं इति भणित्वा
मूर्छितः। एकैवक्वा ... महतामवस्थां सूक्ष्माणि वस्त्राण्यथवा पिकेष्या॥ करात्र लग्ना जिनयोवत्सावरं गांतरं गच्छथ वास
माकां दृष्टिताबाहु शोपेंस्यकु तायमपरो विधि। कोऽपि जीवपतवर्जितः पीडयातुनः॥ मात्सर्यं मुक्त्वा विचार्य कार्यं आ

र्याः सम पर्दिषिं दयदं तु ॥ सेव्या नितंबाः किं च स्तनधराणां उत स्मेरविलासिनीनां। एवं दिव्यत्वणसेविषं कृत्वा गंगां गमत्कुमार
स्तुं गगामतः। मार्गे भोजनवेलायां ब्राह्मणगृहं संप्राप्तः। पुत्रान्नपुटिकां कृत्वा ब्राह्मणगृहे गतः॥ भिक्षां देहीति अक्षरद्वय
मश्रुतं। तद्भिस्मृत्य देहि देहि इति वदति भिक्षार्थं द्विज आगत इति तया ब्राह्मण्या स्वयं सादितं पायससपुटिकायां क्षिप्ता।
सद्विजः वटच्छायायां पुटिकां मुक्त्वा ... प्रक्षालनाय गतः। वटशाखायां श्येनेन सर्पं गृहीत्वा ... तस्याः समयां सु
पतितं तेनाविज्ञाय भोजनं कृतं। भोजनं कृतवति ब्राह्मणे ... तेन ब्राह्मणेन स्वपत्नी निज गृह ... मारिता ग
वृषश्चाल्लघातकीति॥ मत्तं प्रमत्तमुन्मत्तं श्रांतं क्रुद्धं बुभुक्षितं। ... रथं तीर्थं नरो पुंहंति धर्मवित्॥ एवं कथानकं क
थित्वा वेताळेनोक्तं राजन् कस्य हत्या भविष्यति तत्कथय विक्रमेणोक्तं। सर्पस्य सहजं गरलं तस्य किं पापं आ
ह्मण्याः पापसंदत्तं तस्याः किं पापं। ब्राह्मणो न जानाति तस्य किं पापं। यः पक्षं वदति तस्य पापं॥ एवं श्रुत्वा गतो
वेताळः॥ ॥ इति देवस्वामीकथानकं द्वादशं॥ ॥ अस्ति चंद्रनाम नगरं तत्र राजा धरणीधरः तस्मिन्नगरे सदा श्रेष्ठी
धर्मध्वजः तस्य पुत्री ... नी रूपवती ... सा पितृगेहे वर्धमाना नवयौवना संजाता॥ ... नगरे कश्चन
चोरः ... धृतः ... मार्गे ... नासिकाबन्धनं। पत्नी नास्ये ... ब्राह्मणं गतः

विनियमः कल्पितो यौवनेन ॥ यथा यथा विशाल्यस्या हृदये दर्पपरः । तथा तथा ग्रहिलो तोऽसौ के संचरतस्तेनो । तद्राज्ञा चिंतितं म
न्नगरे चौरोपद्रवो वर्तते । अथाहमेकाकी रात्रौ भ्रमणं करिष्यामि । ततः राजा यावद्भ्रमति तावत्पुरुषो दृष्टः राज्ञोक्तं कोऽसि त्व
मिति तेनोक्तं । अहं चौरः । त्वं नापि दुष्टः कस्त्वं राज्ञोक्तं अहमपि चौरः । तर्हि त्वं चौर्यं तत्क्वापि मिलित्वा मुह्यतः नगरं बोधयि
त्वा चौरेण सह राजा प्रविष्टः पातालनगरे ... कस्यचिद्गृहे प्रविष्टे । राजा बहिः स्थितः । तावच्चेटी समायाता त
योक्तं स्वामि कथमत्रागतो क्षिप्रं इत्यगच्छ । राज्ञोक्तं मार्गभ्रमे आगतः भाग्निवेशितं तया दर्शितो मार्गः । तेन मार्गेण
राजा निजनगरं प्राप्तः । द्वितीयदिने प्रातः राज्ञा नृपवेषं कृत्वा सचौरद्रव्याणि गृहीत्वा कूपाद्यावन्निर्गतः । तावद्रूप
हृतयो दृष्टा । तान्दृष्ट्वा तेन शूरेण युद्धं विधाय सर्वे व्यापादिता । तदनंतरं अन्यसैन्यं प्रेष्य राज्ञा चौरो धृत्वा निजनगरं नीतः
वध्यस्थाने शूलारोपणाय प्रेषितः । तदा सर्वेऽपि लोकाः ... शिरस्करमारु... यावत्पश्यंति तावद्वणिजो धर्मध्वज
स्य दुहिता चौरं दृष्ट्वा सानुरागा संजाता । तया निजपिता भणितः । तात राजभवनं गत्वा द्रव्यं दत्त्वा चौरं मोचय । ततस्तद्वचः श्रु
त्वा ... श्रेष्ठी राजभवनं गत्वा विज्ञापितवान् । राजन्कोटिद्रव्यमितं द्रव्यं दास्यामि चौरं मुंच । राज्ञोक्तं अने
न मदीयसैन्यं व्यापादितं कथं मुंचामि तत् चौरेण बाधायतः । यमानेन श्रुत्वा प्रथमं रुदितं मृतोऽसौ चौरः । तं मृतं दृष्ट्वा तया व

णिक्कन्यया ... काष्ठानि मेलयित्वा चितायां यावत्प्रविशति तावद्गगनस्थितया देव्योक्तं । सखि तुष्टाहं वरं ब्रूहि । यदि तुष्टासि
तर्हि अयं मद्भर्ता अक्षतशरीरो जीवतु । देव्या तथा कृते तुष्टः ... चौरः संज्ञां प्राप्य ताभ्यां सह पातालनगरे गतः । एवं कथ
यित्वा वेतालेनोक्तं । विक्रम चौरेण प्रार्थनंतरं रुदितं पश्चाद्धसितं केन कारणेन । तेनोक्तं । अपरिचितेयं कथं मम मांसार्थं द्रव्यं दत्त्वा
मोचयति कथं मदस्याः प्रत्युपकारं करिष्यामीति रुदितं । पश्चाद्धसितं स्त्रीणां चैर्यमधिकं मरणसमयेऽपि ममानुरागा
जाता । उक्तं च ॥ लक्ष्मीलक्षणहीने च कुलहीने सरस्वती । कुपात्रे रमते नारी गिरौ वर्षति माधवः ॥ काके शौचं द्यूतकारेषु स
त्यं क्लीबे धैर्यं मद्यपे तत्त्वचिंता ॥ सर्पे क्षांतिः स्त्रीषु कामोपशांतिः राजा मित्रं केन दृष्टं श्रुतं वा ॥ एवं श्रुत्वा गतोऽसौ वेता
लः ॥ ॥ इति श्री... कथानकं त्रयोदशं ॥ ॥ अस्ति कोशांबी नाम नगरी । तस्यां सुविचारो नाम राजा प्रतिवसति स्म ।
तस्य दुहिता चंद्रप्रभा । सा नवयौवना सखीभिः सह क्रीडितुं उद्यानं गता । सा यावत्क्रीडां करोति तावद्धामनो नाम ब्राह्म
णः समायातः । ... मनोहरं तां दृष्ट्वा कामपूरं गतः । आत्मानं न वेत्ति विकल्पः ... तस्मिन्काले मूलदेव
न दृष्टः । तस्य नारी ... चिंतितं ... पुरुषस्तावद्देवोद्यानं ... तावद्विध ...
विनयमपि समर्पितं तावद्देवी ... मुक्ता श्रवणपथं ... एते यावद् ... दिनादि हृदये

ईदृशी किमवस्था। ब्राह्मणेनोक्तं। राजकन्या मया दृष्टा। रूपमोहितोऽहं। मूलदेवेनो...

दृष्टिबाणाः पतंति॥ मूलदेवेनोक्तं॥ यदि त्वं राजकन्यां पश्यसि तर्हि च सुखं कस्त्वां न विधास्यति। ब्राह्मणेनोक्तं। प्रभूतं द्रव्यं दास्यामि
॥ श्लोकं॥ नोपसर्पंति विप्राणां केवलं गुणिनं विना। तं च नोपार्जितं मा स्म भोगदितं वर्तं न च चरितं नो श्रीदितं वाजिनः॥ यौवनं बाह्यकुलं
वगः स्वनसुखं स्वप्नोपिना सादितं हा कष्टं विफलं कनं मम वयो ऽरण्ये यथा मालती॥ सद्यः प्राणकरं तोयं सद्यस्त्री हरते मनः॥
सद्यः प्रीतिकरं दानं सद्यः प्राणहरं विषं॥ स्त्रीसंभोगात्परे लोके न सौख्यं न रसायनं॥ कर्णानां कृतार्थत्वं युगपद्येन जा
यते॥ रसानां लुब्धत्वं सूत्रं एतात्मकं कृतं च यत्॥ कृतस्य सारं स्वर्गश्च स्वर्गस्य सारं नृणां प्रीतः॥ सर्वेषामपि रत्नानि स्त्रि
यः रत्नमनुत्तमं॥ तदर्थं धनमिच्छंति तत्त्यक्तस्य धनेन किं॥ फलं धर्मस्य विभवो विभवस्य फलं सुखं॥ सुखमूलं हित
त्वं गीविनातो कुतः सुखं॥ येनालंगिता मृदंगी कमलाकमलानना॥ मुधा श्रेष्ठं पानकं विना हा निष्फलं पयो धरा॥ नो श्री २०
त्पन्नं एवं संसारे डी वस्तु स्वर्ण तथा॥ तच्छ्रुत्वा मूलदेवेनोक्तं। दृष्टा मया राजकन्या। ततो मूलदेवः घुटिकामादाय ब्रा
ह्मणाय ददौ॥ दे ब्राह्मणस्त्री रूपं धारय ... नाम्नी लीलया॥ इमां मुखे क्षिपेति सर्वं च से कथितं। स्वयमेकां गुटिकां
मुखे विक्षेप। ततः स्वयं वृद्धो ब्राह्मणः अभूत्॥ कन्यां करे गृहीत्वा राजकुलं गतः। राजानमाह॥ येनाकार्यं गतिर्तु
स्मिन्दिवा मन्ये नाधिगत्य वेदः संतुष्य दिजं बोनि श्रोत्रियो वा नरो यैवनो। भीता स्त्रियं भवन पतिनापर्वतं शेगवा ये
दे॥

सर्वां विष्णुर्विषमचरितः पातु देवादिदेवः॥ इति श्रुत्वा सोत्युक्त्वा राज्ञे आशीः प्रयुक्ता। राज्ञा चासनं दत्तं। राजा पृच्छति हे ब्रा
ह्मण किमर्थं कुतः आगतः। तेनोक्तं राजन् गंगापारात्समागतः। तत्र मम पुत्रः षोडशवार्षिकः तद्विवाहं चिंतयापतितो ऽहं दूर
तरं कन्यायाचनार्थं गतः। तत्रैषा कन्या लब्धा। तां गृहीत्वा यावदागतो निजं तावन्नाव प्राजकं संजातं मे पुत्रः कुत्रापि गत इति
न ज्ञायते तज्जननी पुत्रवियोगेन मृता। इदानीमिमां कन्यां तवपार्श्वे मुक्त्वा पुत्रान्वेषणाय गच्छामि। मयि आगते सति कन्या दा
तव्या तावदिमां पितृवत्परिपालयेति। तच्छ्रुत्वा राज्ञोक्तं स्वामिनादेशः प्रमाणं सुखेन तिष्ठतु इति श्रुत्वा गतो सौ वृद्धः॥
ततः राजा स्वनंदिनीमाहूय कन्यां तस्यै ददौ॥ अपि चेयं ब्राह्मणस्य कन्या इमां परिपालय॥ आसने शयने भोज
ने नोचितेऽन्यानकार्यो। ततः सा राजकन्यया सार्धं सर्वदा क्रीडां चकार। तयोः महती प्रीतिः समजायत। कदाचिद्रात्रौ उ
ता राजकन्यां रहः रूपधारिणी चवाच। सखि त्वं दिने दिने कृशांगी कथं कथय। तयोक्तं। अयि प्रियसखि कदाचिदहं क्री
डार्थं उद्यानं गता। तत्रैको रूपवान्पुरुषो दृष्टः। तद्रूपमोहिताहं। तस्य गृहं न जानामि। यदि स जनो न विद्यते तर्हि जीवि
तेन फलं॥ तद्दिनानंतरं श्रुत्वा सहृदया कृशांगी जाता। रूपधारिण्योक्तं॥ अहं तव दर्शयामि। तमेव पुरुषं त्वं क्षो
गार्थं निधाय दर्शयामि॥ मुखे क्षिप्य गुटिकां आकृष्टा सद्यः पुरुषो जातः। तस्याः आश्चर्यं संजातं स एवायं पुरुषः

तेन सह सुखसंभोगं यथेष्टं चकार। एवं प्रतिदिनं रात्रौ पुरुषवेषेण दिवा स्त्रीवेषेण तिष्ठति। कदाचिन्मंत्रिपुत्रेण सा
रूपधारिणी दृष्टा। एषा मद्भार्या न भविष्यति चेन्मर्दिसफलं जीवितमिति स्यचिंतयन्। नो चेन्मरिष्यामि। तदा लज्जां वि
हाय मंत्रिणं पितरं नु वाच। तच्छ्रुत्वा मंत्री राजानमिदं महत्तौतं ज्ञापितवान्। राज्ञोक्तं। नहीदृशो धर्मो राजसु प्रवर्तते।।
अन्यस्य कन्या कथं देया। तर्हि मत्पुत्रो मरिष्यति। तस्मिन्मृते अहमपि मरिष्यामि। राज्ञा चिंतितं। एवं जाते मद्राज्ये मंत्रि
या विनाक्षयं गमिष्यति। एवं संदिग्धे कन्या देयादिति निश्चितं रूपधारिणी प्रति राजा उक्तं। त्वं मंत्रिपुत्रस्य भार्या भवति
तयोक्तं। अहं ब्राह्मणवधूः कथं अन्यस्य भार्या भवामि। तदा सपरिवारेण राज्ञा विज्ञप्ता सती राजानमुवाच। त्वमेवमति
तापं करिष्यसि तत्कुरु। इति श्रुत्वा हृष्टो राजा कन्यां मंत्रिपुत्राय ददौ। दानकाले तया उक्तं पितः मया पूर्वं किंचित्कल्पि
तं शृणु मां परिणीय यत्र तीर्थयात्रा षण्मासिकी कर्तव्या। पश्चान्मया सह भोगः कर्तव्यः। इति तच्छ्रुत्वा मंत्रिपुत्रेण तथै। २१
व विवाहो जातः। पश्चाच्छांबर उवाच। मम भार्या सर्वविहिता तत्र त्वमीपं रक्षितव्या। अहं तीर्थयात्रां गमिष्यामि। अ
यमिपुत्रवानद्ययं बहु स्वदेशापरि पालयेति उक्त्वा तीर्थयात्रां जगाम। तस्य भार्या सौभाग्यवती नाम्नी कदाचिच्छांबरवाच
। बाले एषमेवं पतिपरं अहं पुरुषसंबंधं न जानामि। परोऽपि पुरुषः कोऽपि न लभ्यते मम महती यौवनावस्था वर्तते तदपि

राज्ञोक्तं। सखि त्वयापि किं पापं कृतं यदेतस्य पत्नी जाता त्वमपि दुःखभागिनी भविष्यसि तच्छ्रुत्वा रूपधारिण्योक्तं।
रात्रावहं पुरुषो भूत्वा तवेच्छां पूरयामि। तयोक्तं। किं मां प्रतारयसि। तदा मुखान्घुटिकां निष्कास्य सद्यः पुरुषो जातः तया स
हसंभोगं कृतवान्। एवं दिवा स्त्रीवेषेण तिष्ठति रात्रौ पुरुषवेषेण तया सह भोगं करोति। किं बहुना षाण्मासमेवं चकार। ष
ड्मासे षष्ठे तीर्थान्तेषु मंत्रिपुत्रः समायातः। तद्दिन एव रूपधारिण्या चिंतितं। एतस्य गृहे यावदन्यो न जानाति तावद्गंतव्यं।
इति रात्रौ सा पुरुषरूपं धृत्वा तद्गृहादुत्थाय गत्वा धूर्तस्य मूलदेवस्याग्रे वृत्तांतं कथितं। तच्छ्रुत्वा मूलदेवः शशिनामानं स्वपुत्रं क
रे गृहीत्वा गतोऽसौ राजभुवनं। राज्ञा यासनं दत्तं राजा म्लानवदनस्तं मूलदेवं पर्यायेण पृच्छयामास। भोजनवेलायां पृष्टं। राजन् त
त्प्रसादात्सुभेल हं। ऋतु घाकु त्रास्ति ति तेनोक्तं। नाव्हाउजनं कर्त्तव्यं कुत्रापि न क्रीडां करोति। तच्छ्रुत्वा राजा ब्राह्मणो वलो
क्तं भवतु। भुक्ते सति राज्ञा विज्ञप्तो ब्राह्मणः वृत्तांतः कथितः। ब्राह्मणः कुपितः राजन् त्वं धार्मिकः मत्पुत्रवधूः कथ
मपि अपसि रक्ष्य दद्दे दिनो चेच्छापं दास्यामि। महाराज्ञा भयात् स्वकीया कन्या तस्मै ब्राह्मणाय प्रदत्ता। व
स्त्रावेषं कृत्वा धार्मिको ब्राह्मणः राजकुमारीं गृहीत्वा गतः। तत्र ग्रामनत्र भूमिस्थितः शशिवामनस्तयो राजक
न्यायां विवादो जातः। तयोर्विवादं स्वप्नेऽपि बोद्धुं न शक्तः। एवं कथानकं कथयित्वा वेतालो उक्तं। राजन् विज्ञ

...कमनेरस्य भार्या अथ निलेनो ऽक्तं पुत्रो ज्ञात्वा न कथय। स्त्रियेस्वापी भुवि जावि भविष्यसि। राज्ञो ऽक्तं॥
...शशिध्वजस्य भार्या भवति तेनोक्तं। एवं विमनेन सहसैव गंगातः बहुदिनैस्तस्य गतेऽपि न विष्यति तस्य क
...र्थं न भवति। कथं च शशिध्वजस्य राज्ञो नैः। पूर्वं तेन पृष्ट मनालु क्त्वा शशिध्वजेन तुष्टो कश्चिद्दितापरिणीता तस्याः
गर्भे जातोऽपि पुत्रः शशिध्वजस्य पीडाद कर्त्रिकं कृष्यति अतस्त्स्वयं वाचिता एवं श्रुत्वा गतो सोऽपि विनायकः॥ ॥इति श
शिध्वजकथानकं चतुर्दशं॥ ॥गणेशमेकदंतं च गजवक्त्रं चतुर्भुजं॥ नमामि परयत्नेन त्यंविघ्नवशी परमेश्वरं॥
अस्ति हिमाचलो नाम पर्वतः। तत्र विद्याधरराजा जीमूतकेतुर्नाम तेन पुत्रार्थं कल्पवृक्षः समाराधितः। तेन तुष्टेन जीमूतवाहनो
नाम पुत्रो दत्तः। कीदृशः। नित्यं परोपकारी सर्वदा दानपरः सर्वयज्ञपरायणः। न येन प्रजापालकः सेव्यसे धाराग्र्यहस्य च तिष्ठ श्री
आसीत्। तस्मिन् स्थिते नोपसर्गाः कृयं तत्र परचक्रं न पश्यन्ति। न दस्युचौरतो वापि न दंशमशकादयः॥ वर्षाणाम् पुत्रादर्वाक् नास्ति २२
मृत्युकृतं भयं। कामवर्षी च पर्जन्यो नित्यं सस्यवती मही॥ गावश्च घटदोहिन्यो पादपाश्च सदा फलाः। पतिव्रतपरा नार्यस्तस्मिन्
राज्ये प्रशासति। तेन जीमूतवाहनेन सम्यक् प्रपालिता। कदाचित्तस्य वैरिपिराजभिः तस्य नगरं वेष्टितं। एवं शत्रुभयं दृष्ट्वा। पिता भणि
तं हे पुत्र इदानीं किं कर्तव्यं। तर्हि तव माम् अपि च सर्वेऽपि राज्यं [illegible] वध्या। [illegible] रक्षणीयं। युद्धं कर्तव्यमित्युक्ते। पुत्रः प्राह। पिता

नमथ

परहिंसा या महापापं वर्तते। स्वशरीररक्षणार्थाय अन्यस्य वधः कथं कार्यः॥ अनित्यस्य शरीरस्य सर्वदोषमयस्य च [illegible]
स्य च रक्षार्थं नैव पापं करोम्यहं॥ अनित्यानि शरीराणि विभवो नैव शाश्वतः॥ नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः॥
गोशतादपि गोक्षीरं प्रस्थं प्रस्थशतादपि॥ प्रासादं मंचकस्थाने शेषाः परविभूतयः॥ क्षुधासमं नास्ति [illegible]
ग्रासमं नास्ति शरीरभूषणं॥ चिंतासमं नास्ति शरीरशोषणं क्षमासमं नास्ति शरीररक्षणं [illegible]
मलयपर्वतं गतः॥ तत्रैव सती जीमूतवाहनस्य मधुरनाम्नी [illegible] च संजातः। तेन [illegible]
जीवितेन [illegible] तत्र राजपुत्री [illegible] तेन सह जीमूतवाहनो दृष्टः॥ [illegible]
सुंदरः। तं दृष्ट्वा चिंतितवान् पुत्र्यै मित्रावसुं आहूय विचारयामास। हे पुत्र त्वं [illegible] विवाहं [illegible]
वरस्तु बहु श्वने। अयं वरः समीचीनः। अस्मै देया इति ते नापित थेत्युक्तो। राज्ञा स्वपुत्रो मित्रावसुं [illegible]
वाहं प्रेषितः। तेन सर्वा कथितं मलयगिरिचालुर्यंन सिता [illegible] कायेति [illegible] तेन [illegible]
[illegible] परिणीता। विवाहे जाते। अन्यदा [illegible] सह [illegible] नाय [illegible] सर्व [illegible] श्री रवर

दृष्ट्वा बालकः पृष्टः किमिदं दृश्यते।। तेनोक्तं सर्पास्थीनि। पुनः पृष्टः कथं सर्पास्थीनि अत्र संति। तेनोक्तं।
पाताळाद्बहवो नागाः समायाताः।। गरुडेन सर्पोपि भक्षिताः तेषामस्थीनि दृश्यंते। इत्युक्त्वा बालकः।। किंचि
द्दिसमंतं कार्ये सत्वा स्वगृहं गतः।। जीमूतवाहनो यावत्तिष्ठति तावद्वृद्धायाः रुदंत्याः शब्दः श्रुतः।।
हा पुत्र हा पुत्रेति तेन पृष्टा वृद्धा किमिति रोदिषि। तयोक्तं मत्पुत्रस्य मरणं भविष्यति अतोहं रोदामि।। नागार्थे गरुडो आ
स्यति समत्पुत्रमिमं शंखचूडं नागं भक्षयिष्यति। अतोहं रोदामि। जीमूतवाहनेनोक्तं आत्मानं दत्वा त्वत्पुत्रं मोचयिष्या
मि। तत्पुत्रेण शंखचूडेनोक्तं।। उत्पद्यंते विलीयंते मद्विधाः क्षुद्रजंतवः।। परार्थमुद्यमा [illegible] २२
नां हितार्थ मुद्यतः कुतः।। राजन् अधमदीय समयः यावद्गरुडो आयाति तावद्गोकर्णेश्वरदर्शनं [illegible]
कृत्वा आगमिष्यामि। तावद्गरुडं स्थिरी कुरु।। राज्ञा प्यंगीकृतं। सोपि गतः। जीमूतवाहनो वध्यशिलायां उपविष्टः।
सर्पविनाशाय गरुडो प्यागतः।। उक्तं च।। तावत्सर्पविनाशाय सतार्क्ष्योऽतिविक्रमः।। पयोव (ध्य) ध्यशिलां व्याप्य
पाताले च दिशो दश।। एवमागतं गरुडं दृष्ट्वा जीमूतवाहनो न भीतः। गरुडेनागत्य चंचूप्रहारेण ताडयित्वा उत्पतितः।

गमने। शंखचूडोपि तस्यां शिलायां आगत्य यावत्पश्यति तावदाश्चर्ये जीमूतवाहनेन गगनेन याति। तं दृष्ट्वा तार्क्ष्यं प्राह।।
मुंच मुंच गरुड एनं पुरुषं मां भक्षय अहं तेन भक्ष्य आसं इति श्रुत्वा गरुडोपि शंकितः। किं मया पापं कृतं रिपुं विहाय
अन्यः कथमानीतः। कस्त्वं किमर्थं वध्यशिलायामुपविष्टः। तेनोक्तं गरुड किमनेन विचारेण स्वहितं कुरु मां भक्षयेति
श्रुत्वा गरुडेनोक्तं। राजन् त्वं परार्थं प्राणान् जहासि। सत्वाधिकस्त्वं।। उक्तं च।। घृष्टं घृष्टं पुनरपि पुनश्चंदनं चारुगंधं
छिन्नं छिन्नं पुनरपि पुनः स्वादुमानिक्षुदंडं।। दग्धं दग्धं पुनरपि पुनः कांचनं कांतवर्णं प्राणांतेन प्रकृतिविकृतिर्जायते
सज्जनानां।। निंदंतु नीतिनिपुणा यदि वा स्तुवंतु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं।। अद्यैव वा मरणमस्तु युगांत
रे वा न्यायात्पथः प्रविचलंति पदं न धीराः।। छायामन्यस्य कुर्वंति स्वयं तिष्ठंति चातपे।। फलंति च परार्थे च नात्महेतोर्म
हाद्रुमाः।। न स्मरंत्यपराधानि स्मरंति सुकृतानि च।। सदा परार्थे निरताः साधवः पुरुषोत्तमाः।। पशवोपि हि जीवंति केवलं
स्वोदरंभराः।। स तु जीवतु मान् श्लाघ्यः परार्थे यस्तु जीवति।। ब्राह्मणार्थे गवार्थे वा स्वाम्यार्थे जीवरक्षणे।। यः पुमांस्त्य
जति प्राणान् स पुनर्याति संस्मृतिं।। बंधनस्थो हि मातंगः सहस्त्रभरणक्षमः।। न च कः छंदचारी स्वोदरं भर्तुं न क्षमः।।

एवमुक्त्वा पुनर्गरुडेनोक्तं ॥ वरं ब्रूहि जीमूतवाहन तेनोक्तं । यदि तुष्टोसि तर्हि इतः परं नागाः न भक्षणीयाः ॥
तथेति गरुडेनांगीकृतं । गरुडो गतः । जीमूतवाहनः परिवारेण सह स्वमाश्रमं गतः । एवं कथानकं कथयि-
त्वा वेतालेनोक्तं । जीमूतवाहनशंखचूडयोर्मध्ये कः सत्वाधिकः । राज्ञोक्तं । शंखचूडः सत्ववान् वेतालेनो-
क्तं । केन प्रकारेण । येन त्वं पुनरागतः । गरुडं प्रति भणितं मां भक्षयेति । वेतालेनोक्तं । येन परार्थे प्राणदा-
नं कृतं स कथं न सत्वाधिकः । राज्ञोक्तं । जन्मप्रभृति तस्य प्राणत्यागे अभ्यासोस्ति । एवं श्रुत्वा गतो
वेतालः ॥ ॥ इति जीमूतवाहनयोः कथानकं पंचदशमं ॥ ॥ अस्ति विजयपुरं नाम नगरं । तत्र धर्म २५
ध्वजो नाम राजा । तत्र सागरदत्तो नाम श्रेष्ठी तस्य सुता उन्मादिनी नाम । तस्याः भुजौ मृणालौ युक्तौ करौ
तथा शोणपाणी रक्तनखांगुली पीनोत्तुंगसमावृत्तौ कठिनौ स्तनौ स्तवकोपमौ नाति विरलौ । कक्षौ
चक्रवाकयुगोपमौ ॥ स्वल्पकं मध्यदेशं मुष्टिग्राह्यमनुत्तमं । नातिमंदजंघा लावण्यं
वलित्रयं विदधती रोमराजिश्च केशपाशः बिंबफलं मन्मथायतनं तथा ॥

मिंदुः किं पद्मं किमु सुरबिंबं किमु सुखं सरोजे किं मीनौ किमु मदनबाणौ । के मुहुर्ते ॥ स्वर्गो वा गुह्यं वा कनककलशौ वा
चौ तडिल्लता तारा वा कनकलतिका वा किमु वक्त्रं ॥ एवंविधं रूपं दृष्ट्वा परस्परं रूपं दृष्ट्वा परस्परमालोच्य भणितं । मंत्रिण
। यद्येनां राजा भार्यां करिष्यति तदा अस्यामासक्तचित्तो भूत्वा राजकर्म न करिष्यतीति । एवं संचिंत्य राजानं प्रति
लक्षणेयं कन्या देवस्य योग्या न भवति । सा सेनापतिना बलधरेण परिणीता । अलक्षणेति राज्ञा मुक्ता । अन्य
यात्राप्रकार्येण गतः तावत् तन्नृपतिना वेदे श्रृंगारभवनोपरि दृष्टा । क्षुभितो राजा देवी मानुषी वा या वदेवं चिंत
द्दृष्ट्वा स्वगृहं गतः ॥ प्रतिहारेणोक्तं । देव शरीरे किं दुःखं । उपकार्यां गतोहं कस्यचित् भवनोपरि देवी मानुषी अतिसुरूपा
सा न देवोहं स्मृता भवति नापश्यद्दृष्टा स्मरदायिनी ॥ स्पृष्टा भवति मोहाय सा नाम दयिता कथं ॥ प्रतिहारेणोक्तं
आद्यं तस्या मिता अलक्षणेति त्यक्ता सेनापतिना बलधरेण विवाहिता । राज्ञोक्तं चिंतितोहं तदा राज्ञा मंत्रिणः
यादेवा पद अवादिरलक्षणेति मां प्रतिविश्रब्धं । सा सर्वांगसुंदरी मनुष्याणां कथं भविष्यति रूपं भवतीमं मंत्रिणोक्तं ॥ य
हं दासः । मां परकारणेन देवस्याग्रे अलक्षणेत्युक्तं । तत्समये सेनापतिना बलधरेण श्रुत्वा विज्ञप्तं ॥ देवस्या
यं दासी । तदर्थं कामाच स्त्री [illegible] नीयतामिति धर्मं राज्ञो भार्या दासस्त्र तत्सुतः ॥ एतस्मिन् धि

गच्छंति न स्यचस्य वचनं॥ राज्ञोक्तं॥ परस्त्रीगमनं राज्ञामधर्मः॥ ॥मातृवत्परदाराश्च परद्रव्याणि लोष्टवत्॥ आत्मवत्सर्वभू
तानि यः पश्यति स पश्यति॥ गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनां॥ अतिप्रछन्नपापानां शास्ता वैवस्वतो यमः॥ सेना
पतिनोक्तं॥ मयादत्तस्य दासी पुद्गत्ता कथं परस्त्री॥ राज्ञोक्तं॥ परलोके निंदितं तन्न कार्यं इत्युक्त्वा राजा दशामीमवस्थां प्राप्तः॥
चक्षुःप्रीतिर्मनःशक्तिः संकल्पो जागरस्तथा॥ तनुता विषयद्वेषो व्याधिरुन्मादुएवच॥ लज्जानाशस्तथोन्मादो मूर्छामरणमे
वच॥ इति दशामावस्था॥ प्रथमेच महाचिंता द्वितीये द्रष्टुमिच्छति॥ तृतीये दीर्घनिश्वासश्चतुर्थे ज्वरमादिशेत्॥ पंचमे दह्य
ते गात्रं षष्ठे भुक्तं न रोचते॥ सप्तमेतूत्कटः कामो नंदस्यादष्टमे तथा॥ नवमे प्राणसंदेहो जीवितं दशमे त्यजेत्॥ मृतोसौ रा
जा॥ राजानं मृतं दृष्ट्वा सेनापतिः गुरुं नमस्कृत्य राज्ञासह अग्निं प्रविष्टः॥ उन्मादिन्या भणितं गुरो मम अपि धर्मं कथय॥ २५
गुरुः॥ ॥श्मशाने नीयमानं तु भर्तारं यानुगच्छति॥ पदे पदे अश्वमेधस्य फलं प्राप्नोत्यसंशयं॥ साध्वीनामथनारीणामग्नौ
प्रपतनादृते। नान्यो धर्मो हि विज्ञेयो मृते भर्तरि कर्हिचित्॥ गुरोर्वचमाकर्ण्य स्नानं दानं तपः कृतं॥ चितां प्रदक्षिणीकृत्य ग
ता सा मृतसन्निधौ॥ एवं कथानकं कथयित्वा वेतालेनोक्तं॥ केन प्रकारेण सेनापतिनादीयमानां निजां भार्यां धर्मविरुद्धा
मिति विचार्य न स्त्री कृता। सेनापतिः स्वामिना सह अग्निं प्रविष्टः॥ तद्युक्तमेव तस्य भार्या अग्नौ प्रविष्टा तदपि युक्तं स्त्री॥ आ
त्रयाणां मध्ये कः सत्वाधिकः॥ राज्ञोक्तं राजा सत्वाधिकः॥ वेतालेनोक्तं २

णानेष धर्मः॥ एवं श्रुत्वा गतो वेतालः॥ सुखस्यानंतरं दुःखं मनुष्याणां चक्रवत्परिवर्तते॥ ॥इति उन्मादिनी कथान
कं षोडशी॥ ॥सुरासुरशिरोरत्ननिघृष्टचरणाय च॥ विघ्नांधकारसूर्याय गणेशाय नमो नमः॥ अस्ति वंकोलना
म नगरं तत्र गुणशेखरो नाम राजा॥ तत्र श्रेष्ठी यज्ञदत्तो नाम। तस्य दुहिता धनवती नाम॥ तां गृहीत्वा यावत्पिता रात्रौ नि
र्गतः मार्गे गच्छति तावद्वृक्षे प्रक्षिप्तेन चौरेण सा दृष्टा। तदा चौरो वदति॥ ॥सुखस्य दुःखस्य न कोपि दाता परो ददातीति
कुबुद्धिरेषा॥ स्वकर्मसूत्रग्रथितो हि लोकः कृतं भुनक्तीति वृथाभिमानः॥ अघटितघटितानि घटयति घटितसुघटि
तानि जर्जरीकुरुते॥ विधिरेव तानि घटयति यानि पुमान्नैव चिंतयति॥ धनवत्योक्तं॥ हे चौर किं दुःखं करोषि चौरेणो
क्तं॥ एतद्वदुःखं किं पृच्छसि॥ तदा तत्पितुरग्रे चौरेण विज्ञापितं॥ देवणिकू तव दुहि नाम मदेया॥ सुवर्णसहस्रं ते दास्या
मि तेन तथेत्युक्त्वा कन्या चौराय दत्ता॥ सुवर्णसहस्रं तत्पित्रा भणितं हे चौर त्वं मरिष्यसि मम कन्यां सुत्रो म शिः कथं जनि
ष्यति। चौरेणोक्तं॥ ऋतुसमये मदीयं द्रव्यं ब्राह्मणाय दत्वा तेन सह संबंधं विधाय पुत्रोत्पत्तिः कार्या चौरेण द्रव्यं कथितं
पूर्वस्यां दिशि वटस्याधः सुवर्णस्य लक्षद्वयं निक्षिप्तमस्ति। तद्द्रव्यं गृहाण इत्युक्त्वा मृतः सो चौरः॥ सोपि वटस्थं द्रव्यं गृहीत्वा
वंकोलनगरे हृष्टमनाः समायातः॥ सा मातृगृहे वर्द्धमाना युवती संजाता॥ तत्रावसरे वसुः स्वपयति मुनी नामपि

दृष्टं कुर्वंदंबाक्रांतं हृदयम् हृदः कानकुरुते ॥ गतिर्मंदीकृता गरतिगमनं मन्मथवता अहो स्तन्याभ्याम् ल्यंतरुणिम संव
र्द्धियते ॥ अन्यस्मिन् दिने स्वः उपवने परिसखीभिः क्रीडमानया तया एको ब्राह्मणो दृष्टः ॥ तं ब्राह्मणं सर्वावयवसंपूर्णं दृष्ट्वा
कामं मोहिता ॥ सख्याग्रे कथितं ॥ सख्या ब्राह्मणो मातृसमीपे आनीतः ॥ मात्रा उक्तं ॥ हे ब्राह्मण मम सुता अतुला तावदस्ति ते
त्वं तस्यां पुत्रमुत्पादय तव सहस्रं सुवर्णं दास्यामि ॥ एकांतेन तया सह सार्द्धं भोगः कृतः प्रातः सख्या इष्टा देह सखि वल्कलेन
सहकर्पूरविलसितं ॥ तच्छ्रुत्वा कांतेन त्वमुपागते विगलितानी [illegible] स्वयं बंधना था सोपि स्वयमेव स्वच्छा गुरु च्छतं किं चिन्तितं बे
स्थितः ॥ एतावता सखि वेदि केवलमहं तस्यां गर्भसंगे पुनः कोयं कावयं मन किं तु गुरुतरं स्वल्पापि मे स्मृतिः ॥ सा गुर्विणी जाता ॥ क सं
ष्टिपूर्णे पुत्रः संजातः ॥ तया रात्रौ स्वप्नो दृष्टः ॥ जटाजूटार्द्धचंद्रबंधस्य शरश्चांक कृततिरश्चारः ॥ सितलसद्विलिप्तांगः रसितयशोपवी श्री
तवान् ॥ नवकृ खट्वांगडमरुरुंडमालाधारिनं ॥ पिनाकं कंकणं घंटा त्रिशूलं वामहस्तके ॥ अक्षपाणि समाकारं पश्चपृष्टेनि २६
योजितं ॥ एवंविधः स्वप्ने दृष्टः ॥ तेन पुरुषेणोक्तं ॥ पुत्रं मंजूषायां निधाय सुवर्णदशसहस्रटंकसंयुक्तं राजद्वारे स्थापयेति ॥ एवं
विधः स्वप्नः मातुरग्रे तथा कथितः ॥ तयोक्तं ॥ स्वप्नस्तथ्यः कर्तव्यः ॥ तदा भैरवाज्ञापि स्वप्नो दृष्टः ॥ तत्रापि तपस्विनोक्तं ॥ तद्द्वारे पुत्र स्थि
तिमंजूषायां स राजपदयोग्यः ॥ तेनापि स्वप्नोपि न ज्ञातः कस्याग्रे राज्ञा कथितः ॥ ततः प्रातःकाले द्वारपालेन दृष्टा मंजूषा प्रमानी

द्वि

ता राज्ञा उद्घाटिता ॥ तस्यां दशसाहस्रसुवर्णटंकसहितः पुत्रो दृष्टः सर्वलक्षणैः परीक्षितः ॥ ॥ पंचदीर्घः पंचसूक्ष्मः सप्त
रक्तः षडुन्नतः ॥ त्रिहृस्वः पृथुलस्त्रिगंभीरः द्वात्रिंशल्लक्षणोह्यसौ ॥ भुजौ नेत्रे तथा नासा चिबुकं चापि तानि च ॥ पंचदीर्घाणि
शस्तानि दिव्यस्य पदनाम्यथा ॥ त्वक्केशांगुलिदशनं पर्वाण्यंगुलिनान्यपि ॥ पंचसूक्ष्माणि शस्तानि तथा दीर्घायुषे
स्यवे ॥ पाण्योस्तले च नेत्रांतौ तालुजिह्वाधरोष्ठकं ॥ सप्तारुणं च सनखं महते थ पिसुखकं ॥ कक्षौ कुक्षिश्च वक्षश्च
घ्राणस्कंधललाटकं ॥ सर्वशास्त्रसमुद्दिष्टमुन्नतं हि षडत्र स्यते ॥ ललाटकटिवक्षांसि [illegible] विस्तीर्णानि [illegible] श्रुतः ॥ स्वरेण
सत्वनाभिस्त्रयं दिग्गंभीरोपमीरितः ॥ ग्रीवाजंघा मेढ्रं [illegible] त्रिर्ह्रस्वं समुच्यते ॥ राज्ञा हरिदत्तो नाम सुतो लब्धः ॥ प्रदत्तरात्री
हस्ते समर्पितः ॥ ततः कालेन षोडशाब्दवर्षे संजातः ॥ पठितानि सर्वशास्त्राणि ॥ कदाचित् स्वकेराजा मृतः ॥ तस्य पुत्रो हरिदत्तो नर
राज्ये तु प्रविष्टः ॥ किमन्येन पुत्रेण यः काशगयायां पिंडदानं करोति स एव पुत्रः नान्यः ॥ ॥ पश्य चित्रं [illegible] यास्वर्णज [illegible] ॥ तस्य
ज्ञानं च मोक्षं च किं जटालम्ब्य चीवरे ॥ यदि वसति गुहायां पर्वताग्रे शिलायां यदि च सततं दंडं नग्नमुंडं जटायां ॥ यदि पठति
पुराणं सर्वशास्त्रार्थयज्ञं यदि हृदयमशुद्धं सर्वमेतन्निरर्थं ॥ दानं प्रजातपश्चैव तीर्थसेवाकृता तथा ॥ सर्वमेतद्वृथा तस्य
स्य अहं नमानसं ॥ श्रद्धाहीनं क्रियाहीनं देहमाश्रित्य पतंति ॥ तदेव श्राद्धे पिंडं श्राद्धं पितृणां नोपतिष्ठते ॥ मकाक्षीव घोतदेवो

न पाषाणेन कांचने ॥ जो येहि विधिनेदेवो स्तस्माज्ञावो दिकारणं ॥ स हि दशोगयां गत्वा पितृनु दिश्य पावलिंडं दर्नैं करोति तावद्धस्त

ऋयं दृष्टं ॥ ततो हरिदत्तो विस्मयं गतः ॥ कस्य पिंडं ददामीति विस्मितः ॥ एवं कथानकं कथयित्वा वेतालेनोक्तं विक्रम एतेषां मध्ये को वा

पिंडाधिकारी ॥ राज्ञोक्तं ॥ चौरस्तस्य हस्ते पिंडो देयः ॥ वेतालेनोक्तं ॥ ब्राह्मणस्य वीर्येणोत्पन्नः स ब्राह्मणः कथं न पिंडाधिकारी ॥

अथ वा राज्ञा प्रतिपालितः स कथं राजापि न पिंडाधिकारी ॥ राज्ञोक्तं ॥ ब्राह्मणस्य वीर्यं मौल्येन गृहीतं ॥ तस्य नाधिकारः ॥ राज्ञापि सु

वर्णं गृहीत्वा पालितः ॥ तस्यापि नाधिकारः ॥ एवं श्रुत्वा हृष्टो भूतो गतो शिंशपावृक्षे ॥ ॥ इति हरिदासकथानकं सप्तदशं ॥ ॥ श्री

अस्ति उज्जयनी नाम नगरी तत्र राजा महासेनो नाम ॥ तत्र ब्राह्मणो देवशर्मा ॥ तस्य पुत्रो गुणाकरो नाम ॥ स प्रत्यहं द्यूतं करोति

यत्किंचिद्गृहे द्रव्यं स्थितं तत्सर्वं द्यूतेन हारितं ॥ पित्रा स गृहान्निर्वासितः ॥ ततो सौ देशांतरे यावद्गच्छति तावद्देव्यायतनं प्रतिगतः ॥

तत्र योगिनी दृष्टा ॥ नमस्कृत्योपविष्टः ॥ योगिन्या उक्तं ॥ तव प्राघूर्णिकीं करिष्यामि ॥ नक्तं तावत् भोजनमिति ब्राह्मणेन चिंतितं ॥ यक्षि २७

णी विद्या समायाता ॥ किमाज्ञापयति ॥ भगवत्या आदिश्यतां ॥ उक्तं योगिन्या अस्य ब्राह्मणस्य भोजनं दीयतां ॥ एवं यक्षिण्या

सर्वं दिव्य भवनं तत्र कृतं ॥ भोजनं कारितं ॥ रात्रौ विलसितानेन प्रभाते सा गता ॥ पुनः यावत् पश्यति तावद्भग्नगृहं न च यक्षिणी

[illegible] योगेन मरिष्यामि ॥ योगिन्या उक्तं ॥ सा विद्या वचनेन गच्छति ॥ तेनोक्तं ॥ अहं विद्यां साधयिष्यामि परं कुटुंबमिति लात्वा पुनरागमिष्या

[illegible] वत्स गुणाकर एतावंति दिनानि कुत्र गमितानि ॥ कथं गृहं विस्मृतं ॥ पतिव्रता धर्मशास्त्रास

[illegible] श्रवर्जने पुत्र [illegible] हास्य [illegible] ॥ न गार्हस्थ्यात्परो धर्मो न गृहं गृहिणी परं ॥ न तीर्थं पितृमात्

[illegible] नातरं पितरं चैव यो निंदति नराधमः ॥ न तेषां [illegible] गमनं मे [illegible] जायते ॥ गुणाकरेणोक्तं ॥ अमेध्यपू

[illegible] कुकेश्य [illegible] गंधि निश्चोषवर्जिते ॥ कथं वरं मूत्रपुरीषभाजने रमंति मूढा नरमंति पंडिताः ॥ मृतश्चाहं

[illegible] मातश्चाहं पुनर्मृतः ॥ नाना योनिर्मया दृष्टा पुत्रः कस्य पिता तथा ॥ शुक्रशोणितसंयोगाद्देहः संजायते पुनः ॥ नित्य

मूत्र पूर्णश्च तेनायं अशुचिः स्मृतः ॥ देहः संशोध्यमानोपि पंचगव्यकुशादिभिः ॥ दृश्यमाणाङ्गावो निर्मलत्वं न गच्छति ॥

[illegible] शुद्धि विद्धी नानां तीर्थयात्रा करोति किं ॥ ज्ञातवो पि जले धौतं सुराभांडमिवाशुचिः ॥ माता कस्य पिता कस्य भ्राता कस्य सहो

[illegible] नानोजातिर्द्विजा वानां [illegible] पदे पदे ॥ अग्निक्रियावतां देवो दिवि देवो मनीषिणां ॥ प्रतिमा स्वल्पबुद्धीनां ज्ञानिनां हृदये

[illegible] योगेश्चोगमयं सुखेक्षय [illegible] गुणेश्च [illegible] ॥ मौनं [illegible]

[illegible] नाद्वयं [illegible] महावैराग्यमेवाश्रयं ॥ एवं भणित्वा पुनर्गृहान्निर्गतः ॥ तत्रागत्य योगिनी नमस्कृता ॥ तेन मंत्राराधन

कृतं ॥ तथापि वेदे यक्षिणी न समायाता ॥ एवमुक्तं वेतालेन पृष्टं ॥ राजन्नायाता केन कारणेन ॥ राज्ञोक्तं ॥ योगेन हीनस्य कुतो सिद्धि

सत्येन हीनस्य कुतोऽस्ति पूजा॥ नयेन हीनस्य कुतो ... लक्ष्मीः॥ धर्मेण हीनस्य कुतोऽस्ति सिद्धिः॥ ... ...चिन्ते ... न मिति नृप
... स्य कुतः सिद्धिरिति कुपितोऽपि किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वकर्मणा॥ प्रक्षीणे ... बुद्धिः कर्मानु
सारिणी॥ एवं श्रुत्वा ततो वेतालः॥ ... अस्य कथानकं॥ ॥अस्ति चित्रकूटं नाम नगरं॥ तत्र परमवीरो नाम राजा॥
... ... गतो सो तुरगामारुह्य यावद् गच्छति तावत् स्वर्णैर्विहृष्टो तत्तुरगं वि श्राम्य यावद्रातो ... ...
... वनं ... तद्वनानुसारेण कस्यचिद् ऋषेराश्रमं गतः॥ उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः॥ पूजनीयो यथान्या
... ... भ्यागतो गुरुः॥ ... तपसा ... ध्याने ... ध्ययने न च॥ यो धर्मः ... ते ते ... स्वर्गगामिन॥ तथा ... श्री
तत्र ... यावत्तत्र तिष्ठति तावत्तस्याः पिता तत्रैव समायातः॥ राज्ञा नमस्कृतो सौ तपोधन. तेन राजा आपृष्टः कथमेकाकी स २८
... विद्यासमा ...॥ पापर्द्धिप्रसंगेन. तपोधनेनोक्तं राजन् महापापं क्रियते॥ एकः पापानि कुरुते फलं भुंक्ते महाजन॥ ...
... दिव्य ... वनं तत्र ... लिप्यते॥ राज्ञोक्तं॥ स्वामिन् ... विधाय मम ... धर्मं किं ... ॥ ऋषिणोक्तं॥ न गोप्रदानं न म
... दानं ... सर्वप्रदाने ... प्रधानं॥ सर्वे वेदेषु ... सर्वे यज्ञेषु वा
... गनम ... ॥ ... प्रधानं॥ ... महाप्रधानं सर्वप्रदाने ... ॥ एकतो ... प्राणिनः प्राणरक्षणं॥
... तथा॥ एकतो मेदिनी दानं ... ॥ एकतो ... प्राणिनः ...